This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शीर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/अपूर्ण)	टीकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
मिताक्षरासाहित याज्ञवल्क्यस्मृती	-	धर्मशास्त्र	अपूर्ण	-	3/12	66	संस्कृत	कागद	9			

M-2898

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथमिताक्षरासहितयाज्ञवल्क्यस्मृतिःप्रारभ्यते.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरुभ्योनमः श्रीमद्ग्रंथकृद्भ्योनमः धर्माधर्मौतद्विकारास्त्रयोपिक्लेशाः पंचप्राणिनामायतंते यस्मिन्नेते
नैपरामृष्टईशोयस्तंवंदेविष्णुमोंकारवाच्यम् १ याज्ञवल्क्यमुनिभाषितंमुदुर्विश्वरूपविकटोक्तिविस्तृतम् धर्मशास्त्रमृजुभिर्मिताक्षरैर्बालबुद्धि
विधयेविविच्यते २ याज्ञवल्क्यशिष्यः कश्चित्प्रश्नोत्तररूपंयाज्ञवल्क्यप्रणीतंधर्मशास्त्रंसंक्षिप्यकथयामास यथामनुनोक्तंभृगुः तस्यचाद्यमा
द्यश्लोकः योगिनांसनकादीनामीश्वरः श्रेष्ठस्तंयाज्ञवल्क्यसंज्ञंसंपूज्यमनोवाक्कायकर्मभिः पूजयित्वामुनयः सामश्रवःप्रभृतयः श्रवणधारण-
योग्याअब्रुवन् उक्तवंतः धर्मान्नोस्मभ्यंब्रूहीति कथंअशेषतःकार्त्स्न्येन केषांवर्णाश्रमेतराणां वर्णाब्राह्मणादयः आश्रमाब्रह्मचारिप्रभृतयः

श्रीगणेशायनमः योगीश्वरंयाज्ञवल्क्यंसंपूज्यमुनयोऽब्रुवन् वर्णाश्रमेतराणांनोब्रूहिधर्मानशेषतः १

इतरेअनुलोमप्रतिलोमजातामूर्द्धावसिक्तादयः इतरशब्दस्यद्वंद्वेचेतिसर्वनामसंज्ञाप्रतिषेधः अत्रचधर्मशब्दः षड्विधस्मार्तधर्मविषयः
तद्यथावर्णधर्मः आश्रमधर्मः वर्णाश्रमधर्मः गुणधर्मः निमित्तधर्मः साधारणधर्मश्चेति तत्रवर्णधर्मोनित्यंमद्यंब्राह्मणोवर्जयेदित्यादिः आश्र
मधर्मअग्नींधनभैक्षचर्यादिः वर्णाश्रमधर्मः पालाशोदंडोब्राह्मणस्येत्येवमादिः गुणधर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्यराज्ञः प्रजापालना
दिः निमित्तधर्मोविहिताकरणप्रतिषिद्धसेवननिमित्तंप्रायश्चित्तंसाधारणोधर्मः अहिंसादिः नहिंस्यात्सर्वभूतानीत्याचांडालंसाधारणोधर्मः
श्रुत्युक्तः शौचाचारांश्चशिक्षयेदित्याचार्यकरणविधिप्रयुक्तत्वाद्धर्मशास्त्राध्ययनस्यप्रयोजनादिकथनंनातीवोपयुज्यते तत्रचाद्यंक्रमःप्रागु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पनयनात्कामचारकामवादकामभक्षाः ऊर्ध्वमुपनयनात्प्राग्वेदाध्ययनोपक्रमाद्धर्मशास्त्राध्ययनं ततोधर्मशास्त्रविहितयमनियमोपेतस्यवेदाध्ययनं ततस्तदर्थजिज्ञासाततस्तदनुष्ठानमिति तत्र यद्यपिधर्मार्थकाममोक्षाः शास्त्रेणानेनप्रतिपाद्यंतेतथापिधर्मस्यप्राधान्याद्धर्मग्रहणंप्राधान्यंच-धर्ममूलत्वादितरेषां नचवक्तव्यंधर्ममूलोर्थोर्थमूलोधर्मइति अविशेषइति यतोर्थमंतरेणापिजपतपस्तीर्थयात्रादिनाधर्मनिष्पत्तिः अर्थ-

मिथिलास्थः सयोगींद्रः क्षणंध्यात्वाब्रवीन्मुनीन्
यस्मिन्देशेमृगः कृष्णस्तस्मिन्धर्मान्निबोधत २

लेशोपिनधर्ममंतरेणेति एवंकाममोक्षावपीति १ एवंपृष्टः मिथिलानामनगरीतत्रस्थितः सयाज्ञवल्क्यः योगीश्वरः क्षणंध्यात्वाकिंचित्कालंमनःसमाधाय एतेश्रवणाधिकारिणोविनयेनपृच्छंतीतियुक्तमेतेभ्योवक्तुमित्युक्तवान्मुनीन् किंयस्मिन्देशेमृगः कृष्णस्तस्मिन्धर्मान्निबोधतेति कृष्णसारोमृगोयस्मिन्देशेस्वच्छंदंविहरतितस्मिन्देशेवक्ष्यमाणलक्षणाधर्माअनुष्ठेयानान्यत्रेत्यभिप्रायः शौचाचारांश्चशिक्षयेदित्याचार्यस्यधर्मशास्त्राध्यापनविधिः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिष्येणतदध्ययनंकर्तव्यमितिकुतोवावगम्यतइत्यतआह पुराणंब्राह्माादि न्यायस्तर्कविद्या मीमांसावेदवाक्यविचारः धर्मशास्त्रंमानवादि अंगानिव्याकरणादीनिषट् एतैरुपेताश्चत्वारोवेदाः विद्याः पुरुषार्थसाधनज्ञानानितासांस्थानानिचचतुर्दश धर्मस्यचचतुर्दशस्थानानिहेतवः एतानिचत्रैवर्णिकैरध्येतव्यानितदंतर्भूतत्वाद्धर्मशास्त्रमप्यध्येतव्यं तत्रैतानिब्राह्मणेनविद्याप्राप्तयेधर्मानुष्ठानायचाधिगंतव्यानि क्षत्रियवैश्याभ्यांधर्मानुष्ठानाय तथाचशंखेनविद्यास्थानान्यनुक्रम्योक्तं एतानिब्राह्मणोधिकुरुतेसचवृत्तिंदर्शयतीतरेषामिति मनुरपिद्विजातीनांधर्मशास्त्राध्ययनेधिकारोब्राह्मणस्यप्रवचनेनान्यस्येतिदर्शयति निषेकादिश्मशानांतोमंत्रैर्यस्योदितोविधिः तस्यशास्त्रेधिकारोस्मिन्ज्ञेयोनान्यस्यकस्यचि

पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाःस्थानानिविद्यानांधर्मस्यचचतुर्दश ३ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः यमापस्तंबसंवर्त्ताःकात्यायनबृहस्पती ४ पराशरव्यासशंखलिखितादक्षगौतमौ शातातपोवसिष्ठश्चधर्मशास्त्रप्रयोजकाः ५

त् विदुषाब्राह्मणेनेदमध्येतव्यंप्रयत्नतः शिष्येभ्यश्चप्रवक्तव्यंसम्यङ्नान्येनकेनचिदिति ३ अस्तुधर्मशास्त्रमध्येतव्यंयाज्ञवल्क्यप्रणीतस्यास्यशास्त्रस्यकिमायातमित्यतआह उशनःशब्दपर्यंतोद्वंद्वैकवद्भावः याज्ञवल्क्यप्रणीतमिदंधर्मशास्त्रमध्येतव्यमितिभावः नेयंपरिसंख्याकिंतुप्रदर्शनार्थमेतत् अतोबौधायनादेरपिधर्मशास्त्रत्वमविरुद्धम् एतेषांप्रत्येकंप्रामाण्येपिसाकांक्षाणामाकांक्षापरिपूरणमन्यतःक्रियते विरोधेतुविकल्पः ४ ५ ६ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानींधर्मस्यकारकहेतूनाह देशोयस्मिन्देशेमृगः कृष्णइत्युक्तलक्षणः कालः संक्रान्त्यादिः उपायः शास्त्रोक्तेतिकर्तव्यताकलापः द्रव्यंप्रतिग्रहादि लब्धंगवादि श्रद्धाआस्तिक्यबुद्धिः तदन्वितंयथाभवतितथा पात्रंनविद्यतेत्येवमादिवक्ष्यमाणलक्षणं प्रदीयतेयथानप्रत्यावर्ततेतथापरस्वत्वाप त्त्यवसानंत्यज्यतेएतद्धर्मस्योत्पादकं किमेतावदेवनेत्याह सकलमिति अन्यदपिशास्त्रोक्तंजातिगुणयागहोमादितत्सकलंधर्मस्यकारकं जातिगुणद्र व्यभावार्थात्मकंचतुर्विधंधर्मस्यकारकमित्युक्तंभवति तच्चसमस्तंव्यस्तंवायथाशास्त्रंद्रष्टव्यम् श्रद्धासर्वत्रानुवर्ततएव ६ इदानींधर्मस्य ज्ञापकहेतूनाह श्रुतिर्वेदः स्मृतिर्धर्मशास्त्रं तथाचमनुः श्रुतिस्तुवेदोविज्ञेयोधर्मशास्त्रंतुवैस्मृतिरिति सदाचारः सतांशिष्टानामाचारः अनुष्ठानंना-

देशेकालउपायेनद्रव्यंश्रद्धासमन्वितम् पात्रेप्रदीयतेयत्तत्सकलंधर्मलक्षणम् ६ श्रुतिःस्मृतिःसदाचारःस्वस्यचप्रि यमात्मनः सम्यक्संकल्पजःकामोधर्ममूलमिदंस्मृतम् ७ ईज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् अयंतुपरमोधर्मोय द्योगेनात्मदर्शनम् ८

शिष्टानांस्वस्यचात्मनः प्रियंवैकल्पिकेविषये यथागर्भाष्टमेष्टमेवाब्देइत्यादिष्वात्मेच्छैवनियामिका सम्यक्संकल्पा ज्जातः शास्त्राविरुद्धः कामः यथामयाभोजनव्यतिरेकेणोदकंनपातव्यमिति एतेधर्मस्यमूलंप्रमाणं एतेषांविरोधेपूर्वपूर्वबलीयस्त्वं ७ दे- शादिकारकहेतूनामपवादमाह ईज्यादीनांकर्मणांअयमेवपरमोधर्मः यद्योगेनबाह्यचित्तवृत्तिनिरोधेनात्मनोदर्शनंयथातथ्यज्ञानम् योगेनात्म ज्ञानेदेशादिनियमोनास्तीत्यर्थः तदुक्तं यत्रैकाग्रतातत्राविशेषादिति ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारकहेतुषु ज्ञापकहेतुषु वा संदेहे निर्णयहेतुमाह चत्वारो ब्राह्मणाः वेदशास्त्रधर्मज्ञाः पर्षत् तिस्रो विद्या अधीयंत इति त्रैविद्याः तेषां समूहस्त्रैवि
द्यं धर्मशास्त्रज्ञत्वमत्राप्यनुवर्तते तद्वा पर्षत् सा पूर्वोक्ता पर्षत् यं ब्रूते स धर्मः अध्यात्मज्ञानिषु निपुणतमो वेदधर्मशास्त्रज्ञश्च एकोपि वा यं ब्रूते सोः
पि धर्मः ९ इत्युपोद्घातप्रकरणं एतैर्नवभिः श्लोकैः सकलशास्त्रोपोद्घातमुक्त्वा इदानीं वर्णादीनां धर्मान्वक्तुं प्रथमं तावद्वर्णानाह ब्राह्मणक्षत्रि
यवैश्यशूद्राश्चत्वारो वर्णा वक्ष्यमाणलक्षणास्तेषामाद्यास्त्रयो ब्राह्मणक्षत्रियवैश्या द्विजाः द्विर्जायंत इति द्विजाः तेषां द्विजानां वै एव न शूद्रस्य नि

चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा सा ब्रूते यं स धर्मः स्यादेको वाध्यात्मवित्तमः ९ ब्रह्मक्षत्रियविट्शूद्रा वर्णा
स्त्वाद्यास्त्रयो द्विजाः निषेकाद्याः श्मशानांतास्तेषां वै मंत्रतः क्रियाः १० गर्भाधानमृतौ पुंसः सवनं स्पंदनात्पुरा ष
ष्ठेष्टमे वा सीमंतो मास्येते जातकर्म च ११ अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः षष्ठेन्नप्राशनं मासि चूडा कार्या य
थाकुलम् १२ षेकाद्याः निषेको गर्भाधानमाद्यो यासां तास्तथोक्ताः श्मशानं पितृवनं तत्संबंधि कर्म अंतो यासां ताः क्रिया मंत्रैर्भवंति

१० इदानीं ताः क्रिया अनुक्रामति गर्भाधानमित्यनुगतार्थं कर्मनामधेयं एवं वक्ष्यमाणान्यपि तद्गर्भाधानमृतौ ऋतुकाले वक्ष्यमाणलक्षणे पुंसवना
ख्यं कर्म गर्भचलनात्पूर्वं षष्ठे ष्टमे वा मासि सीमंतोन्नयनं एते च द्वे पुंसवनसीमंतोन्नयने क्षेत्रसंस्कारकर्मत्वात्सकृदेव कार्ये न प्रतिगर्भं यथाह देवलः सकृ
त्सु संस्कृता नारी सर्वगर्भेषु संस्कृतेति एते आइत्ते आगते गर्भकोशात्कुमारे जाते जातकर्म एकादशेहनि नामकरणं तच्च पितामहमातामहादि संबद्धं कुलदेवता
संबद्धं वा यथाह शंखः कुलदेवतासंबद्धं पिता नाम कुर्यादिति चतुर्थे मासि निष्क्रमलक्षणं कर्म सूर्यावेक्षणं कर्म षष्ठे मास्यन्नप्राशनं कर्म चूडाकरणं तु यथाकुलं-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कार्यमितिप्रत्येकंसंबध्यते ११ १२ एतेषांनित्यत्वेप्यानुषंगिकंफलमाह एवमुक्तेनप्रकारेणगर्भाधानादिभिः संस्कारकर्मभिः कृतैरेनः पापंशमंया-
ति किंभूतंबीजगर्भसमुद्भवं शुक्रशोणितसंबद्धंगात्रव्याधिसंक्रांतिनिमित्तंनतुपतितोत्पन्नत्वादि स्त्रीणांविशेषमाह एताजातकर्मादिक्रियाः स्त्रीणांतू
ष्णींविनैवमंत्रैर्यथाकालंकार्याः विवाहः पुनः समंत्रकः १३ गर्भाधानमवधिंकृत्वाजन्मनोवाष्टमेवर्षेब्राह्मणस्योपनायनं उपनयनमेवोपनायनं स्वा
र्थेअण्वृत्तानुसारात् अत्रेच्छयाविकल्पः राज्ञामेकादशे वैश्यस्यसैकेएकादशेद्वादशइत्यर्थः गर्भग्रहणंसर्वत्रानुवर्तते समासेगुणीभूतस्यापिगर्भश

एवमेनःशमंयातिबीजगर्भसमुद्भवम् तूष्णीमेताःक्रियाःस्त्रीणांविवाहस्तुसमंत्रकः १३ गर्भाष्टमेष्टमे
वाब्देब्राह्मणस्योपनायनं राज्ञामेकादशेसैकेविशामेकेयथाकुलं १४ उपनीयगुरुःशिष्यंमहाव्याहृतिपू
र्वकं वेदमध्यापयेदेनंशौचाचारांश्चशिक्षयेत् १५

ब्दस्यबुध्याविभज्योभयत्राप्यनुवर्तनंकार्यं गर्भादेकादशेराज्ञोगर्भाद्वि
द्वादशेविशइतिस्मृत्यंतरवचनात् यथा अथशब्दानुशासनं केषांशब्दानांलौकिकानांवैदिकानामिति अत्रापिकार्यमित्यनुवर्तते कुलस्थित्याकेचि
दुपनयनमिच्छंति १४ स्वगृह्योक्तविधिनाउपनीयशिष्यंगुरुः महाव्याहृतिपूर्वकंवेदमध्यापयेत् महाव्याहृतयश्चभूरादिसत्यांताः सप्तपंचवागोत
माक्षिप्रायेण किंच शौचाचारांश्चवक्ष्यमाणलक्षणान् शिक्षयेत् उपनीयशौचाचारांश्चशिक्षयेदित्यनेनप्रागुपनयनात्कामचारोदर्शितः वर्णधर्मान्व
र्जयित्वास्त्रीणामप्येतत्समानंविवाहादर्वाक् उपनयनस्थानीयत्वाद्विवाहस्य १५ ❀ ❀ ❀

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौचाचारानाह कर्णस्थंब्रह्मसूत्रंयस्यसतथोक्तः कर्णश्चदक्षिणः पवित्रंदक्षिणेकर्णेकृत्वाविण्मूत्रमुत्सृजेदितिलिंगात् असावहनि
संध्ययोश्चउदङ्मुखोमूत्रपुरीषेकुर्यात् चकाराद्रस्मादिरहितेदेशेरात्रौतुदक्षिणामुखः १६ किंच अनंतरंशिश्नंगृहीत्वाउत्थायउद्धृताभि
रद्भिर्वक्ष्यमाणलक्षणाभिर्मृद्भिश्चगंधलेपयोः क्षयकरंशौचंकुर्यात् अतंद्रितः अनलसः उद्धृताभिरितिजलांतःशौचनिषेधः अत्रगंधले
पक्षयकरमितिसर्वाश्रमिणांसाधारणंशौचमिदं मृत्संख्यानियमस्त्वदृष्टार्थः १७ शुचौअशुचिद्रव्यासंस्पृष्टेदेशेइत्युपादानादुपानच्छ

दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः कुर्यान्मूत्रपुरीषेचरात्रौचेद्दक्षिणामुखः १६ गृहीतशिश्नश्चो
त्थायमृद्भिरभ्युद्धृतैर्जलैः गंधलेपक्षयकरंशौचंकुर्यादतंद्रितः १७ अंतर्जानुःशुचौदेशउपविष्टउदङ्मुखः
प्राग्वाब्राह्मेणतीर्थेनद्विजोनित्यमुपस्पृशेत् १८ कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रंकरस्यच प्रजापतिपितृब्र
ह्मदेवतीर्थान्यनुक्रमात् १९

यनासनादिनिषेधः उपविष्टः नस्थितः नशयानः प्रह्वोगच्छन्वा उदङ्मुखः प्राङ्मुखोवे
तिदिगंतरनिवृत्तिः शुचौदेशइत्येतस्मात्पादप्रक्षालनप्राप्तिः ब्राह्मेणतीर्थेनवक्ष्यमाणलक्षणेन द्विजोनशूद्रादिः नित्यंसर्वकालं आ
श्रमांतरगतोप्युपस्पृशेत् आचामेत् कथमंतर्जानुः जानुनोर्मध्येहस्तौकृत्वादक्षिणेनहस्तेनेति १८ तीर्थान्याह कनिष्ठायास्तर्ज-
न्याअंगुष्ठस्यमूलानिकरस्याग्रंचप्रजापतिपितृब्रह्मदेवतीर्थानियथाक्रमंवेदितव्यानि १९ ७ ७

वारत्रयमपःपीत्वा मुखमंगुष्ठमूलेन द्विरुन्मृज्य खानि छिद्राणि ऊर्ध्वकायगतानि घ्राणादीनि अद्भिरुपस्पृशेत् अद्भिर्द्रव्यांतरासंस्पृष्टाभिः पुनरद्भिरित्यब्ग्रहणं प्रतिच्छिद्रमुदकस्पर्शनार्थं पुनस्ता एव विशिनष्टि प्रकृतिस्थाभिः गंधरूपरसस्पर्शांतरमप्राप्ताभिः फेनबुद्बुदरहिताभिः तुशब्दाद्वर्षधारागतानां शूद्राद्यावर्जितानां च निषेधः २० हृत्कंठतालुगाभिरद्भिर्यथाक्रमेण द्विजातयः शुध्यंति स्त्री च शूद्रश्च अंततः अंतेन तालुना स्पृष्टाभिः सकृदिति वैश्याद्विशेषः चशब्दादनुपनीतोपि २१ प्रातःस्नानं यथाशास्त्रमब्दैवतैर्मंत्रैः आपोहिष्ठेत्येवमादिभिः

त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत् अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः २० हृत्कंठ-
तालुगाभिस्तु यथासंख्यं द्विजातयः शुध्येरन्स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः २१ स्नानमब्दैवतैर्मंत्रैर्मार्ज
नं प्राणसंयमः सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः २२ गायत्रीं शिरसा सार्धं जपेद्व्याहृतिपूर्विकाम् प्र
तिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः २३

मार्जनं प्राणसंयमः प्राणायामः वक्ष्यमाणलक्षणः ततः सूर्यस्य चाप्युपस्थानं सौरेण मंत्रेण गायत्र्यास्तत्सवितुर्वरेण्यमित्यादेः प्रतिदिवसं जपः कार्यः कार्यशब्दो यथालिंगं प्रत्येकमभिसंबध्यते २२ गायत्रीं पूर्वोक्तां आपोज्योतिरित्यादिना शिरसा संयुक्तां उक्तव्याहृतिपूर्विकां प्रतिव्याहृति प्रणवेन संयुक्तां ॐ भूः ॐ भुवः ॐ स्वरिति त्रीन्वारान् मुखनासिकासंचारिवायुं निरुंधन्मनसा जपेदित्ययं सर्वत्र प्राणायामः २३ ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राणायामं पूर्वोक्तं कृत्वा तृचेनाब्दैवतेन पूर्वोक्तेनात्मानमद्भिः प्रोक्ष्य सावित्रीं जपन्प्रत्यक्संध्यामासीत अर्थात्प्रत्यङ्मुख इति लभ्यते आ
तारकोदयात् तारकोदयावधि प्राक् संध्यां प्रातः समये एवं पूर्वोक्तविधिमाचरन् प्राङ्मुखः सूर्योदयावधि तिष्ठेत् अहोरात्रयोः संधौ या
क्रिया विधीयते सा संध्या तत्र अहः संपूर्णादित्यमंडलदर्शनयोग्यः कालः तद्विपरीता रात्रिः यस्मिन्काले खंडमंडलस्योपलब्धिः स संधिः
२४ २५ ततः संध्योपासनानंतरं द्वयोः संध्ययोरग्निकार्यं अग्नौ कार्यं समित्प्रक्षेपादि यत् तत्कुर्यात् स्वगृह्योक्तेन विधिना तदनं-

प्राणानायम्य संप्रोक्ष्य तृचेनाब्दैवतेन तु । जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् २४ संध्यां प्राक्
प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपि २५ ततोऽभिवादयेद्वृद्धान
सावहमिति ब्रुवन् २६ गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः आहूतश्चाप्यधीयीत लब्धं तस्मै नि
वेदयेत् हितं तस्याचरेन्नित्यं मनोवाक्कायकर्मभिः २७

तरं वृद्धान् गुरुप्रभृतीनभिवादयेत् कथं असौ देव
दत्तशर्माहमिति स्वनाम कीर्तयन् २६ तथा गुरुं वक्ष्यमाणलक्षणमुपासीत तत्परिचर्यापरस्तदधीनस्तिष्ठेत् स्वाध्यायार्थमध्य
यनमभिद्धयेसमाहितोऽविक्षिप्तचित्तो भवेत् आहूतश्चाप्यधीयीत गुर्वाहूत एवाधीयीत न स्वयं गुरुं प्रेरयेत् यच्च लब्धं तत्सर्वं गुरवे
निवेदयेत् तथा तस्य गुरोर्हितमाचरेत् नित्यं सदा मनोवाक्कायकर्मभिः न प्रतिकूलं कुर्यात् अपिशब्दाद्गुरुदर्शने गोतमोक्तं कंठप्रावृतादि
वर्जयेत् २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतमुपकारंनविस्मरतीतिकृतज्ञः अद्रोहीदयावान् मेधावीग्रंथग्रहणधारणशक्तः शुचिः बाह्याभ्यंतरशौचवान् कल्यः आधिव्याधिर-
हितः अनसूयकोदोषानाविष्करणेन गुणाविष्करणशीलः साधुः वृत्तवान् शक्तः शुश्रूषायां आप्तोबंधुः ज्ञानदः विद्याप्रदः वित्तदः अर्पण
पूर्वकमर्थप्रदाता एते गुणाः समस्ताव्यस्ताश्चयथासंभवंद्रष्टव्याः एतेचधर्मतः शास्त्रानुसारेणाध्याप्याः २८ तथास्मृत्यंतरप्रसिद्धं पाला
शादिदंडं अजिनंचकार्ष्णाजिनादि उपवीतंकार्पासादिनिर्मितं मेखलांचमुंजादिनिर्मितां ब्राह्मणादिर्ब्रह्मचारीधारयेत् २९ पूर्वोक्तदंडा-

कृतज्ञाद्रोहिमेधाविशुचिकल्यानसूयकाः अध्याप्याधर्मतःसाधुशक्ताप्तज्ञानवित्तदाः २८ दंडा
जिनोपवीतानिमेखलांचैवधारयेत् ब्राह्मणेषुचरेद्भैक्ष्यमनिंद्येष्वात्मवृत्तये २९ आदिमध्यावसा
नेषुभवच्छब्दोपलक्षिता ब्राह्मणक्षत्रियविशांभैक्ष्यचर्यायथाक्रमम् ३०

दियुक्तोब्रह्मचारीब्राह्मणेष्वनिंद्ये
षु अभिशस्तादिव्यतिरिक्तेषु स्वकर्मनिरतेषु भैक्ष्यंचरेत् आत्मवृत्तये आत्मनोजीवनायनपरार्थं आचार्यतद्भार्यापुत्रव्यतिरेकेणनिवेद्य
गुरवेतदनुज्ञातोभुंजीत तदभावेतत्पुत्रादावितिनियमात् अत्रचब्राह्मणग्रहणंसंभवेसतिननियमार्थं यत्तुसार्ववर्णिकंभैक्ष्यचरणमि
तितत्त्रैवर्णिकप्राप्त्यर्थं यच्चचातुर्वर्ण्यंचरेद्भैक्ष्यमितितदापद्विषयंकथं भैक्ष्यचर्याकार्या आदिमध्यावसानेषुभवच्छब्दोपलक्षिता भव ५
तिभिक्षांदेहि भिक्षांभवतिदेहि भिक्षांदेहिभवति इत्येवंवर्णक्रमेणभैक्ष्यचर्याकार्या ३० ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वोक्तेनविधिनाभिक्षामाहृत्यगुरवेनिवेद्यतदनुज्ञयाकृताग्निकार्योवाग्यतोमौनी अन्नंसत्कृत्यसंपूज्य अकुत्सयन्ननिंदन् आपोशनक्रियापूर्वं
अमृतोपस्तरणमसीत्यादिकंपूर्वंकृत्वाभुंजीत अत्रपुनरग्निकार्यग्रहणंसंध्याकालेकथंचिदकृताग्निकार्यस्यकालांतरविधानार्थंनपुनस्तृतीयप्रा
स्त्यर्थं ३१ ब्रह्मचर्येस्थितः एकान्नंनाद्यादनापदिव्याध्याद्यभावे ब्राह्मणः पुनःश्राद्धेभ्यर्थितः सन्काममश्नीयात् व्रतमपीडयन्मधुमांसप
रिहारेण अत्रब्राह्मणग्रहणंक्षत्रियादेःश्राद्धभोजनव्युदासार्थंराजन्यवैश्ययोश्चैवनैतत्कर्मप्रचक्षतेइतिस्मरणात् ३२ मधुक्षौद्रंनमद्यंतस्य

कृताग्निकार्योभुंजीतवाग्यतोगुर्वनुज्ञया अपोशनक्रियापूर्वंसत्कृत्यान्नमकुत्सयन् ३१ ब्रह्मचर्येस्थितोनै
कमन्नमद्यादनापदि ब्राह्मणःकाममश्नीयाच्छ्राद्धेव्रतमपीडयन् ३२ मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम्
भास्करालोकनाश्लीलपरिवादादिवर्जयेत् ३३ सगुरुर्यःक्रियाःकृत्वावेदमस्मैप्रयच्छति उपनीयददद्वेदमाचार्यःसउ
दाहृतः ३४

नित्यंब्राह्मणोमद्यंवर्जयेदितिनिषेधात् मांसंछागादेरपिअंजनंघृतादिनागात्रस्यकज्जलादिनाचाक्ष्णोः उच्छिष्टंअगुरोः
शुक्तंनिष्ठुरवाक्यंनान्नरसः तस्याभक्ष्यप्रकरणेनिषेधात् स्त्रियमुपभोगे प्राणिहिंसनंजीववधः भास्करस्योदयास्तमयावलोकनं अश्लीलम-
सत्यभाषणं परिवादः सदसद्रूपस्यपरदोषस्यव्याख्यापनम् आदिशब्दात्स्मृत्यंतरोक्तंगंधमाल्यादिगृह्यते एतानिब्रह्मचारीवर्जयेत् ३३
योसौगर्भाधानाद्याउपनयनांताः क्रियायथाविधिकृत्वावेदमस्मैब्रह्मचारिणेप्रयच्छति सगुरुः यः पुनरुपनयनमात्रंकृत्वावेदंददाति
सआचार्यः ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदस्यैकदेशं मंत्रब्राह्मणयोरेकं अंगानि वा योऽध्यापयति स उपाध्यायः यः पुनः पाकयज्ञादिकं वृतः करोति स ऋत्विक् एते च गुर्वाचार्योपाध्याय
र्त्विजो यथापूर्वं यथाक्रमेण मान्याः पूज्याः एभ्यः सर्वेभ्यो माता गरीयसी पूज्यतमा ३५ वेदग्रहणार्थं ब्रह्मचर्यावधिमाह यदा विवाहात्संस्कारे
वेदानधीत्य वेदौ वा वेदं वेति प्रवर्तते तदा प्रतिवेदं वेदं वेदं प्रति ब्रह्मचर्यं पूर्वोक्तं द्वादश वर्षाणि कार्यं अशक्तौ पंच वा ग्रहणांतिकमित्येके वर्णयंति के
शांतः पुनः गोदानाख्यं कर्म गर्भादारभ्य षोडशे वर्षे ब्राह्मणस्य कार्यं एतच्च द्वादशवार्षिके वेदव्रते बोद्धव्यं इतरस्मिन्पक्षे यथासंभवं द्रष्टव्यं रा

एकदेशमुपाध्याय ऋत्विग्यज्ञकृदुच्यते एते मान्या यथापूर्वमेभ्यो माता गरीयसी ३५ प्रतिवेदं
ब्रह्मचर्यं द्वादशाब्दानि पंच वा ग्रहणांतिकमित्येके केशांतश्चैव षोडशे ३६ आषोडशादाद्वाविंशा
च्चतुर्विंशाच्च वत्सरात् ब्रह्मक्षत्रविशां काल औपनायनिकः परः ३७

जन्यवैश्ययोस्तूपनयनकालवत् द्वाविंशेच
तुर्विंशे वा द्रष्टव्यं ३६ उपनयनकालस्य परमावधिमाह आषोडशाद्वर्षात्षोडशवर्षे यावत् आद्वाविंशादाचतुर्विंशाद्वर्षाद्ब्रह्मक्ष[illegible]विशां औपनायनिकः उ
पनयनसंबंधी परः कालः नातः परमुपनयनकालोऽस्ति किंतु अत ऊर्ध्वं पतंत्येते सर्वधर्मबहिष्कृताः सर्वधर्मेष्वनधिकारिणो भवंति सावित्रीपतिताः पतित
सावित्रीका भवंति सावित्रीदानयोग्या न भवंति व्रात्याः संस्काररहिताश्च व्रात्यस्तोमाख्यक्रतोर्विना कुर्वंते तु तस्मिन् उपनयनाधिकारिणो भवंति ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३८ आद्यास्त्रयो द्विजा इत्युक्तं तत्र हेतुमाह मातुः सकाशात्प्रथमं जायंते मौंजीबंधनात् द्वितीयं जन्म यस्मात्तस्मादेते ब्राह्मणक्षत्रियवैश्या द्विजा
उच्यंते ३९ वेदग्रहणाध्ययनफलमाह यज्ञानां श्रौतस्मार्तानां तपसां कायसंतापरूपाणां चांद्रायणादीनां शुभानां च कर्मणां उपनयनादिसंस्का
राणाम् अवबोधकत्वेन वेद एव द्विजातीनां परो निःश्रेयसकरः मोक्षकरो नान्यः वेद एवेति तन्मूलत्वेन स्मृतेरप्युपलक्षणार्थम् ४० ग्रहणाध्ययन

अत ऊर्ध्वं पतंत्येते सर्वधर्मबहिष्कृताः सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ३८ मातुर्यदग्रे जायंते
द्वितीयं मौंजिबंधनात् ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ३९ यज्ञानां तपसां चैव शुभानां चैव कर्म
णाम् वेद एव द्विजातीनां निःश्रेयसकरः परः ४० मधुना पयसा चैव स देवांस्तर्पयेत् द्विजः पितॄन्मधुघृताभ्यां
चऋचोऽधीते च योऽन्वहम् ४१ यजूंषि शक्तितोऽधीते योऽन्वहं स घृतामृतैः प्रीणाति देवानाज्येन मधुना च पितॄंस्तथा
४२ स तु सोमघृतैर्देवांस्तर्पयेद्योऽन्वहं पठेत् सामानि तृप्तिं कुर्याच्च पितॄणां मधुसर्पिषा ४३

फलमुक्त्वेदानीं काम्यब्रह्मयज्ञाध्ययनफलमाह योऽन्वहं ऋचोऽधीते स मधुना पयसा च देवान् पितॄंश्च मधुघृताभ्यां तर्पयति यः पुनः शक्तितोऽन्व
हं यजूंष्यधीते स घृतामृतैर्देवान्पितॄंश्च मधुघृताभ्यां तर्पयति यस्तु सामान्यन्वहमधीते स सोमघृतैर्देवान् पितॄंश्च मधुसर्पिर्भ्यां प्रीणाति ऋगादि
ग्रहणं सामान्येन ऋगादिमंत्रप्राप्त्यर्थम् ४१ ४२ ४३ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः पुनः शक्तितोन्वहं अथर्वांगिरसोधीते स देवान् मेदसा पितृंश्च मधुसर्पिर्भ्यां तर्पयति यस्तु वाकोनुवाकवाक्यं संप्रश्नोत्तररूपं वेदवाक्यं पुरा
णं च ब्राह्मादि चकारान्मानवादिर्धर्मशास्त्रं नाराशंसीश्च रुद्रदैवत्यान्मंत्रान् गाथाश्च यज्ञगाथेंद्रगाथाद्याः इतिहासान्महाभारतादीन् वि
द्याश्च वारुण्याद्या विद्याः शक्तितोन्वहमधीते स मांसक्षीरौदनमधुसर्पिर्भिर्देवान् पितृंश्च मधुसर्पिर्भ्यां तर्पयति ४४ ४५ ४६ ते पुनस्तृ

मेदसा तर्पयेद्देवानथर्वांगिरसः पठन् पितृंश्च मधुसर्पिर्भ्यामन्वहं शक्तितो द्विजः ४४ वाकोवाक्यं पुराणं च
नाराशंसीश्च गाथिकाः इतिहासांस्तथा विद्याः शक्त्याधीते हि योन्वहम् ४५ मांसक्षीरौदनमधुतर्पणं स दिवौ
कसाम् करोति तृप्तिं कुर्याच्च पितृणां मधुसर्पिषा ४६ ते तृप्तास्तर्पयंत्येनं सर्वकामफलैः शुभैः यं यं क्रतुमधीते सौ
तस्य तस्याप्नुयात्फलम् ४७ त्रिर्वित्तपूर्णपृथिवीदानस्य फलमश्नुते तपसो यत्परस्येह नित्यं स्वाध्यायवान् द्विजः ४८

साः संतो देवाः पितरश्च एवं स्वाध्यायकारिणं सर्वकामफलैः शुभैरनन्योपघातलक्षणैस्तर्पयंति प्रशंसार्थमाह यस्य यस्य क्रतोः प्रतिपादकं वेदैक
देशमन्वहमधीते तस्य तस्य क्रतोः फलमाप्नोति तथा वित्तपूर्णायाः पृथिव्याः त्रिः त्रिवारं दानस्य यत्फलं परस्य तपसश्चांद्रायणादेर्यत्फलं तदपि नि ७
त्यं स्वाध्यायवान् प्राप्नोति नित्यग्रहणं काम्यस्यापि सतो नित्यत्वज्ञापनार्थम् ४७ ४८ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंसामान्येनब्रह्मचारिधर्मानभिधायाधुनानैष्ठिकस्यविशेषमाह अनेनोक्तेनप्रकारेणात्मानंनिष्ठांउत्क्रांतिकालंनयतीतिनैष्ठिकः सयावज्जी
वमाचार्यसमीपेवसेत् नवेदग्रहणकालोत्तरंस्वतंत्रोभवेत् तदभावेतत्पुत्रसमीपे तदभावेतद्भार्यासमीपे तदभावेवैश्वानरेपि अनेनोक्त
विधिनादेहंसाधयन्क्षपयन् विजितेंद्रियः इंद्रियजयेविशेषप्रयत्नवान् ब्रह्मचारीब्रह्मलोकममृतत्वमाप्नोति कदाचिदिहनपुनर्जायते इति

नैष्ठिकोब्रह्मचारीतुसवेदाचार्यसन्निधौ तदभावेस्यतनयेपत्न्यांवैश्वानरेपिवा ४९ अनेन
विधिनादेहंसाधयन्विजितेंद्रियः ब्रह्मलोकमवाप्नोतिनचेहजायतेपुनः ५० गुरवेतुवरं
दत्वास्नायीततदनुज्ञया वेदव्रतानिवापारंनीत्वात्युभयमेववा ५१

ब्रह्मचारिप्रकरणम् ४९ ५० यः पुनर्विवाहार्थस्तस्यविवाहार्थंस्नानमाह पूर्वोक्तेनप्रकारेणवेदंमंत्रब्राह्मणात्मकं व्रतानिब्रह्मचारिध
र्मान् अनुक्रांतान्वाउभयंवापारंनीत्वा समाप्यगुरवेपूर्वोक्तायवरमभिलषितंयथाशक्तिदत्वास्नायात् अशक्तौतदनुज्ञया अदत्तवरोपि
एषांचपक्षाणांशक्तिकालाद्यपेक्षयाव्यवस्था ५१ ५२ ५२ ५२ ५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नानानंतरं किं कुर्यादत आह अविप्लुतब्रह्मचर्यः असखलितब्रह्मचर्यः लक्षण्यां बाह्याभ्यंतरलक्षणैर्युक्तां बाह्यानितनुलोमकेशदशनादीनिम
नुनोक्तानि आभ्यंतराणि अष्टौपिंडान्कृत्वेत्याद्याश्वलायनोक्तविधिनाज्ञातव्यानि पूर्वस्यांरात्रौगोष्ठवल्मीककितवस्थानह्रदरणक्षेत्रचतुष्पथश्म
शानेभ्योमृत्तिकांगृहीत्वापिंडाष्टकंकर्तव्यं तत्रानुक्रमेणप्रथमेपिंडेस्पृष्टेधान्यवतीभवेत् द्वितीयेस्पृष्टेपशुमतीभवेत् तृतीयेग्निहोत्रशुश्रूषण
पराभवति चतुर्थेविवेकिनीचतुरासर्वजनार्जनपराभवति पंचमेरोगिणी षष्ठेवंध्या सप्तमेव्यभिचारिणी अष्टमेविधवाभवेदित्याश्वलायनस्म
रणात् स्त्रियंनपुंसकत्वनिवृत्तयेस्त्रीत्वेनपरीक्षितां अनन्यपूर्विकांदानेनोपभोगेनवापुरुषांतरापरिगृहीतां कांतांकमनीयांवोढुर्मनोनयनानं

अविप्लुतब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहेत् अनन्यपूर्विकांकांतामसपिंडांयवीयसीं ५२

दकारिणीं यस्यांमनश्चक्षुषोर्निबंधस्तस्यामृद्धिरित्यापस्तंबस्मरणात् एतच्चन्यूनाधिकांगादिबाह्यदोषाभावे असपिंडांसमानएकः पिंडो
देहोयस्याः सासपिंडानसपिंडाअसपिंडातां सपिंडताचएकशरीरावयवान्वयेनभवति तथाहिपुत्रस्यपितृशरीरावयवान्वयेनपित्रासहसा-
पिंड्यम् एवंपितामहादिभिरपिपितृद्वारेणतच्छरीरावयवान्वयात् एवंमातृशरीरावयवान्वयेनमात्रातथामातामहादिभिरपिमातृद्वारेण तथा
मातृष्वसृमातुलादिभिरपि एकशरीरावयवान्वयात् तथापितृव्यपितृष्वस्रादिभिरपि तथापत्न्यासहपत्न्याएकशरीरारंभकतया एवंभ्रातृ
भार्याणामपिपरस्परमेकशरीरारब्धैःसहैकशरीरारंभकत्वेन एवंयत्रयत्रसपिंडशब्दस्तत्रतत्रसाक्षात्परंपरयावाएकशरीरावयवान्वयोवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रितव्यः यद्येवंमातामहादीनामपिदशाहंशावमाशौचंसपिंडेषुविधीयतइत्यविशेषेणप्राप्नोतिस्यादेतत् यदितत्रप्रत्तानामितरेकुर्युरित्यादिवि
शेषवचनंनस्यादतश्चसपिंडेषुयत्रविशेषवचनंनास्तितत्रदशाहमित्येतद्वचनमवतिष्ठते अवश्यंचैकशरीरावयवान्वयेनसापिंड्यंवर्णनीयं
आत्माहिजज्ञेआत्मनइत्यादिश्रुतेः तथाप्रजामनुप्रजायस्वेतिच सएवायंविरूढःप्रत्यक्षेणोपलभ्यतइत्याद्यापस्तंबवचनाच्च तथागर्भोप-
निषदि एतत्षाट्कौशिकंशरीरंत्रीणिपितृतस्त्रीणिमातृतः अस्थिस्नायुमज्जानः पितृतः त्वङ्मांसरुधिराणिमातृतइति तत्रतत्राव-
यवान्वयप्रतिपादनात् निर्वाप्यपिंडान्वयेनतुसापिंड्येमातृसंतानेभ्रातृपुत्रादिषुचसापिंड्यंनस्यात् समुदायशक्त्यंगीकारेणरूढिपरि-

अरोगिणींभ्रातृमतीमसमानार्षगोत्रजाम्

ग्रहेअवयवशक्तिस्तत्रतत्रावगम्यमानापरित्यक्तास्यात् परंपरयैकशरीरावयवान्वयेनसापिंड्येयथानातिप्रसंगस्तथावक्ष्यामः यवी
यसींवयसाप्रमाणतश्चन्यूनामुद्वहेत्परिणयेत् स्वगृह्योक्तविधिना ५२ विशेषांतरमप्याह अरोगिणीं अचिकित्सनीयव्याध्यनु
पसृष्टां भ्रातृमतींपुत्रिकाकरणशंकानिवृत्तये अनेनापरिभाषितापिपुत्रिकाभवतीतिगम्यते असमानार्षगोत्रजां ऋषेरिदमार्षं-
नामप्रवरइत्यर्थः गोत्रंवंशपरंपरा सिद्धं आर्षंचगोत्रंचआर्षगोत्रेसमानेआर्षगोत्रेयस्यासौसमानार्षगोत्रस्तस्माज्जातासमाना
र्षगोत्रजा नसमानार्षगोत्रजाअसमानार्षगोत्रजातां गोत्रप्रवरोच्चपृथक्पृथक्पर्युदासेनिमित्तं तेनासमानगोत्रजांअसमानार्षजामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यर्थः तथाच्चासमनप्रवरैर्विवाहइतिगौतमः तथाच असपिंडाचयामातुरसपिंडाचयापितुरितिमनुः तथामातृगोत्रामप्यपरिणेयांकेचिदि
च्छंति मातुलस्यसुतामूढ्वामातृगोत्रांतथैवच समानप्रवरांचैवकृत्वाचांद्रायणंचरेदितिप्रायश्चित्तस्मरणात् अत्रचासपिंडामित्यनेनपितृष्व-
सृमातृष्वस्त्रादिदुहितृनिषेधः तथा असगोत्रामित्यनेनासपिंडाया अपिभिन्नसंतानजायाः समानगोत्रायानिषेधः असमानप्रवरामित्यने-
नाप्यसपिंडाया असगोत्राया अपिसमानप्रवरायानिषेधः तथा असपिंडामित्येतत्सार्ववर्णिकंसर्वत्रसापिंड्यसद्भावात् असमानार्षगोत्रजामि
त्येतत्त्रैवर्णिकविषयं यद्यपिराजन्यविशांप्रातिस्विकगोत्राभावात्प्रवराभावस्तथापिपुरोहितगोत्रप्रवरौवेदितव्यौ तथाच यजमानस्यार्षेयान्

पंचमात्सप्तमादूर्ध्वंमातृतः पितृतस्तथा ५३

प्रवृणीतइत्युक्त्वापौरोहित्यान् राजविशांप्रवृणीतेइत्याहाश्वलायनः सपिंडासुसमानगोत्रासुसमानप्रवरासु भार्यात्वमेवनोत्पद्यते रोगिण्या
दिषुतुभार्यात्वेउत्पन्नेपिदृष्टविरोधएव असपिंडामित्यत्रैकशरीरान्वयद्वारेणसाक्षात्पारंपर्येणचसापिंड्यमुक्तं तच्चसर्वत्रसर्वस्ययथाकथंचिद-
नादौसंसारेभवतीत्यतिप्रसंगइत्यतआह मातृतोमातुः संतानेपंचमादूर्ध्वंपितृतः पितुःसंतानेसप्तमादूर्ध्वंसापिंड्यंनिवर्ततइतिशेषः अतश्चा
यंसपिंडशब्दोवयवशक्त्यासर्वत्रप्रवर्तमानोपिनिर्मंथ्य पंकजादिशब्दवन्नियतविषयएव तथाचपित्रादयःषट्सपिंडाः पुत्रादयश्चषट् आत्मा
चसप्तमः संतानभेदेपियतः संतानभेदस्तमादायगणयेद्यावत्सप्तमइतिसर्वत्रयोजनीयं तथाचमातरमारभ्यतत्पितृपितामहादिगणनायांपं
९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चमपुरुषवर्तिनीमातृतः पंचमीत्युपचर्यते एवंपितरमारभ्यतस्त्रिादिगणनायांसप्तमपुरुषसंतानवर्तिनीपितृतः सप्तमीति तथाच भगि न्योर्भगिनीभ्रात्रोर्भ्रातृपुत्रीपितृव्ययोः विवाहेद्यादिभूतत्वाच्छारवाभेदोवगण्यते यदपिवसिष्ठेनोक्तं पंचमींसप्तमींचैवमातृतः पितृतस्त थेति त्रीनतीत्यमातृतः पंचातीत्यचपितृतइतिचपैठीनसिना तदप्यर्वाङ्निषेधार्थंनपुनस्तत्प्राप्त्यर्थमितिसर्वस्मृतीनामविरोधः एतच्चस मानजातीयेद्रष्टव्यं विजातीयेतुविशेषः यथाहशंखः यद्येकजाताबहवः पृथक्क्षेत्राः पृथक्जनाः एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्ततेत्रि षु एकस्मात् ब्राह्मणादेर्जाताः एकजाताः पृथक्क्षेत्राः भिन्नजातीयासुस्त्रीषुजाताः पृथक्जनाः समानजातीयासुभिन्नासुस्त्रीषुजाताः तेएक

दशपूरुषविख्याताच्छ्रोत्रियाणांमहाकुलात् स्फीतादपिनसंचारिरोगदोषसमन्वितात् ५४

पिंडाः सपिंडाः किंतु पृथक्शौचाः पृथक्शौचमाशौचप्रकरणेवक्ष्यामः पिंडस्त्वावर्ततेत्रिषुत्रिपुरुषमेवसापिंड्यमिति ५३ पुरुषाएवपूरु षाः दशभिः पूरुषैः मातृतः पंचभिः पितृतः पंचभिर्विख्यातंयत्कुलंतस्मात् श्रोत्रियाणामधीतवेदानां अध्ययनमुपलक्षणम् श्रुताध्ययन- संपन्नानां महच्चतत्कुलंचमहाकुलं पुत्रपौत्रपशुदासीग्रामादिसमृद्धं तस्मात्कन्यां आहर्तव्येतिनियम्यते एवंसर्वतः प्राप्तौसत्यामपवादमा ह संचारिणोरोगाः कुष्ठापस्मारप्रभृतयः शुक्रशोणितद्वारेणानुप्रविशंतोदोषाः पुनः हीनक्रियत्वनिः पुरुषत्वादयोमनुनोक्ताः एतैः समन्वि- तात् स्फीतादपिपूर्वोक्तान्महाकुलादपिनाहर्तव्या ५४ छ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंकन्याग्रहणेनियममुक्त्वाकन्यादानेवरनियममाह एतैरेवपूर्वोक्तैर्गुणैर्युक्तोदोषैश्चवर्जितोवरोभवति तस्यायमपरोविशेषः सवर्णउत्कृ
ष्टोवानहीनवर्णः श्रोत्रियः स्वयंचश्रुताध्ययनसंपन्नः यत्नात्प्रयत्नेनपुंस्त्वेपरीक्षितः परीक्षोपायश्चनारदेनदर्शितः यस्याप्सुप्लवतेबीजं
ह्लादिमूत्रंचफेनिलं पुमान्स्याल्लक्षणैरेतैर्विपरीतैस्तुषंढकइति युवानद्धः धीमान्लौकिकवैदिकव्यवहारेषुनिपुणमतिः जनप्रियः स्मितपू
र्वमृदुभिभाषणादिभिरनुरक्तजनः रतिपुत्रधर्मार्थत्वेनविवाहस्त्रिविधः तत्रपुत्रार्थोद्विविधः नित्यःकाम्यश्च तत्रनित्येप्रजार्थेसवर्णः श्रोत्रियो

एतैरेवगुणैर्युक्तः सवर्णः श्रोत्रियोवरः यत्नात्परीक्षितःपुंस्त्वेयुवाधीमान्जनप्रियः ५५ यदुच्यतेद्विजातीनां
शूद्राद्दारोपसंग्रहः नैतन्ममंमतंयस्मात्तत्रात्माजायतेस्वयम् ५६

वरइत्यनेनसवर्णामुख्यादर्शिता ५५ इदानींका
म्येनित्यसंयोगेचानुकल्पोवक्तव्यइत्याह यदुच्यतेकामतस्तुप्रवृत्तानामिमाःस्युः क्रमशोवराइत्युपक्रम्यब्राह्मणस्यचतस्रोभार्याः क्षत्रियस्य-
तिस्रः वैश्यस्यद्वेइतिद्विजातीनांशूद्रावेदनमितिनैतद्याज्ञवल्क्यस्यमतं यस्मादयंद्विजातिस्तत्रस्वयंजायते तज्जायाजायाभवतियदस्यां-
जायतेपुनरितिश्रुतेः अत्रचतत्रात्माजायतेस्वयमितिहेतुंवदतानैत्यकपुत्रोत्पादनायकाम्यकपुत्रोत्पादनायवाप्रवृत्तस्यशूद्रापरिणयन १०
निषेधंकुर्वतानैत्यकपुत्रोत्पादनानुकूल्येकाम्येपुत्रोत्पादनेब्राह्मणस्यक्षत्रियावैश्येक्षत्रियस्यचवैश्याभ्यनुज्ञाताभवति ५६ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानींरतिकामस्योत्पन्नपुत्रस्यधिनष्टभार्यास्याश्रमांतरानधिकारिणोगृहस्थाश्रमावस्थानमात्राभिकांक्षिणः परिणयनक्रममाह वर्णक्रमेणब्रा
ह्मणस्यतिस्रः क्षत्रियस्यद्वेवैश्यस्यैकाशूद्रस्यतुस्वैवभार्याभवति सवर्णापुनः सर्वेषांमुख्यास्थितैव पूर्वस्याः पूर्वस्याअभावेउत्तरोत्तराभवति
अयमेवचक्रमोनैत्यकानुकूलेकाम्येचपुत्रोत्पादनविधौ अतश्चयच्छूद्रापुत्रस्यपुत्रमध्येपरिगणनंविभागकीर्तनंच तथाविप्रान्मूर्धावसिक्तो
हीत्युपक्रम्यविन्नास्वेषविधिः स्मृतइतिचतद्रतिकामस्याश्रममात्राभिकांक्षिणोवानांतरीयकतयोत्पन्नस्य ५७ विवाहानाह सब्राह्मा

तिस्रोवर्णानुपूर्व्येणद्वेतथैकायथाक्रमं ब्राह्मणक्षत्रियविशांभार्यास्वाशूद्रजन्मनः ५७ ब्राह्मोविवाहआहूयदीय
तेशक्त्यलंकृता तज्जःपुनात्युभयतःपुरुषानेकविंशतिं ५८ यज्ञस्थऋत्विजेदैवआदायार्षस्तुगोद्वयं चतुर्दश
प्रथमजःपुनात्युत्तरजश्चषट् ५९ इत्युक्त्वाचरतांधर्मंसहयादीयतेर्थिने सकायःपावयेत्तज्जःषट्षड्वंश्यान्सहात्मना ६०

भिधानोविवाहः यस्मिन्नुक्तलक्षणायवरायाहूययथाशक्त्यलंकृताकन्यादीयते उदकपूर्वकंतस्यांजातः पुत्रः उभयतः पित्रादीन्दशपुत्रादींश्चदश-
आत्मानंचैकविंशंपुनातिसद्वृत्तश्चेत् ५८ सदैवोविवाहः यस्मिन्यज्ञानुष्ठानेवितते ऋत्विजेशक्त्यलंकृताकन्यादीयते यत्रपुनर्गोमिथुनमादा
यकन्यादीयतेसआर्षः प्रथमजोदैवविवाहजः चतुर्दशपुनातिसप्तावरान्सप्तपरान् उत्तरजआर्षविवाहजः षट्पुनातित्रीन्पूर्वान्त्रीन्परान् ५९
सहधर्मंचरतामितिपरिभाष्यकन्यादानंप्राजापत्यः तज्जःषट्पूर्वान्षट्परान् आत्मनासहेत्येवंत्रयोदशपुनाति ६० ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या॰स्मृ॰ ११ आसुरः पुनर्द्रविणादानात् गांधर्वस्तु परस्परानुरागेण भवति राक्षसो युद्धेनापहरणात् पैशाचस्तु कन्यकाछलात् छलेन छद्मना स्वापाद्यवस्था मि॰आ॰ १
स्वपहरणात् ६१ सवर्णादिपरिणयने विशेषमाह सवर्णासु विवाहे गृह्योक्तेन विधिना पाणिरेव ग्राह्यः क्षत्रियकन्या तु शरं गृण्हीयात् वैश्या प्रतोदमाद
द्यादुत्कृष्टवेदने शूद्रा पुनर्वसनस्य दशां यथाह मनुः वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने इति ६२ दातृक्रममाह एतेषां पित्रादीनां पूर्वपूर्वा
भावे परः परः कन्याप्रदः प्रकृतिस्थश्चेत् यद्युन्मादादिदोषवान्न भवति अतो यस्याधिकारः सोऽप्रयच्छन् भ्रूणहत्यामृतावृतावाप्नोति एतच्चोक्तलक्ष

आसुरो द्रविणादानाद्गांधर्वः समयान्मिथः राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात् ६१ पाणिर्ग्राह्यः स
वर्णासु गृण्हीयात्क्षत्रिया शरम् वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः ६२ पिता पितामहो भ्राता सकुल्यो जन
नी तथा कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ६३ अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ गम्यं त्वभावे दातॄणां
कन्या कुर्यात्स्वयंवरम् ६४ सकृत्प्रदीयते कन्या हरंस्तां चोरदंडभाक् दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत् ६५

णवरसंभवे वेदितव्यम् यदा पुनर्दातॄणामभावस्तदा कन्यैव गम्यं गमनार्हं मुक्तलक्षणं स्वयमेव वरयेत् ६३।६४ सकृदेव कन्या प्रदीयत इति शास्त्रनि
यमः अतस्तां दत्वा अपहरन् चोरवद्दंड्यः एवं सर्वत्र प्रतिषेधे प्राप्ते अपवादमाह यदि पूर्वस्माद्वरात् श्रेयान् विद्याभिजनाद्यतिशययुक्तो वर आग ११
च्छति पूर्वस्य च पातकयोगो दुर्वृत्तत्वं वा तदा दत्तामपि हरेत् एतच्च सप्तमपदात् प्राक् द्रष्टव्यम् ६५ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः पुनश्चक्षुर्ग्राह्यं दोषमनाख्याय कन्यां प्रयच्छति असावुत्तमसाहसं दंड्यः उत्तमसाहसं वक्ष्यते अदुष्टां तु प्रतिगृह्य त्यजन् उत्तमसाहसमेव दं
ड्यः यः पुनर्विवाहात्प्रागेव दोषादिना असद्भिः दोषैर्दीर्घरोगादिभिः कन्यां दूषयति स पणानां वक्ष्यमाणलक्षणानां शतं दंड्यः ६६ अनन्यपूर्विकामि
त्यत्रानन्यपूर्वा परिणेयोक्ता तत्रानन्यपूर्वा कीदृशीत्याह अनन्यपूर्वा द्विविधा पुनर्भूः स्वैरिणी चेति पुनर्भूरपि द्विविधा क्षता चाक्षता च तत्र क्षता सं
स्कारात्प्रागेव पुरुषसंबंधदूषिता अक्षता पुनः संस्कारदूषिता या पुनः कौमारं पतिं त्यक्त्वा कामतः सवर्णमाश्रयति सा स्वैरिणीति ६७ एवं सर्व

अनाख्याय ददद्दोषं दंड उत्तमसाहसम् अदुष्टां तु त्यजन्दंड्यो दूषयंस्तु मृषा शतम् ६६ अक्षता च क्षता
चैव पुनर्भूः संस्कृता पुनः स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत् ६७ अपुत्रां गुर्वनुज्ञातो देवरः पुत्रका
म्यया सपिंडो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ६८ आगर्भसंभवाद्गच्छेत्पतितस्त्वन्यथा भवेत् अने
न विधिना जातः क्षेत्रजोस्य भवेत्सुतः ६९

प्रकारेणान्यपूर्वापर्युदासे प्राप्ते विशेषमाह अपुत्रामलब्धपुत्रां पित्रादिभिः पु
त्रार्थमनुज्ञातो देवरो भर्तुः कनीयान् भ्राता सपिंडो वा उक्तलक्षणः सगोत्रो वा एतेषां पूर्वस्य पूर्वस्याभावे परः परः घृताभ्यक्तसर्वांगः ऋतावेव वक्ष्यमा
णलक्षणे इयाद्गच्छेत् आगर्भोत्पत्तेः ऊर्ध्वं पुनर्गच्छन् अन्येन वा प्रकारेण पतितो भवति अनेन विधिनोत्पन्नः पूर्वपरिणेतुः क्षेत्रजः पुत्रो भवेत् एत
च्च वाग्दत्ताविषयमित्याचार्याः यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः तामनेन विधानेन निजो विंदेत देवर इति मनुस्मरणात् ६८ ६९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यभिचारिणीं प्रत्याह याव्यभिचरति तांहृताधिकारां भृत्यभरणाद्यधिकाररहितां मलिनां अंजनाभ्यंजनशुभ्रवस्त्राभरणशून्यां पिंडमात्रोपजी
विनीं प्राणयात्रामात्रभोजनां धिक्कारादिभिः परिभूतां भूतलशायिनीं स्ववेश्मन्येववासयेत् वैराग्यजननार्थं न पुनः शुद्ध्यर्थं यत्पुंसः परदारेषु तच्चै
नांचारयेद्व्रतमिति पृथक्प्रायश्चित्तोपदेशात् ७० तस्या अल्पप्रायश्चित्तार्थमर्थवादमाह परिणयनात्पूर्वं सोमगंधर्ववह्नयः स्त्रियोभुक्त्वा यथा
क्रमं तासां शौचमधुरवचनसर्वमेध्यत्वानि दत्तवंतः तस्मात्स्त्रियः सर्वत्र स्पर्शनालिंगनादिषु मेध्याः शुद्धाः स्मृताः ७१ नचतस्यास्तर्हि दोषो

हृताधिकारां मलिनां पिंडमात्रोपजीविनीम् परिभूतामधःशय्यां वासयेद्व्यभिचारिणीं ७०
सोमः शौचं ददावासां गंधर्वश्च शुभां गिरम् पावकः सर्वमेध्यत्वं मेध्यावैयोषितोह्यतः ७१
व्यभिचाराद्दतौ शुद्धिर्गर्भेत्यागो विधीयते गर्भभर्तृवधादौ च तथा महति पातके ७२

नास्तीत्याशंकनीयमित्याह अप्रकाशितान्मनोव्यभिचारात्पुरुषांतरसंभोगसंकल्पात् यदपुण्यं तस्यऋतौ रजोदर्शने शुद्धिः शूद्रकृते तु गर्भे त्यागः
ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः अप्रजाता विशुध्यंति प्रायश्चित्तेन नेतरा इति स्मरणात् तथा गर्भवधे भर्तृवधे महापातके च ब्रह्महत्यादौ आ
दिग्रहणाच्छिष्यादिगमने च त्यागः चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या पतिघ्नी च विशेषेण जुंगितोपगता च येति व्यासस्मरणात् जुंगितः प्रति
लोमजश्चर्मकारादिः त्यागश्चोपभोगधर्मकार्ययोः नतु निष्काशनं गृहात्तस्याः निरुंध्यादेकवेश्मनीति नियमात्. ७२ ७.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वितीयपरिणयने हेतूनाह सुरांपिबतीति सुरापी शूद्रापि पतत्यर्धशरीरस्य यस्य भार्या सुरांपिबेदिति सामान्येन प्रतिषेधात् व्याधितादीर्घ
रोगग्रस्ता धूर्ताविसंवादिनी वंध्यानिष्फला अर्थघ्नीअर्थनाशिनी अप्रियंवदानिष्ठुरभाषिणी स्त्रीप्रसूः स्त्रीजननी पुरुषद्वेषिणी सर्वत्राहि
तकारिणी अधिवेत्तव्येति प्रत्येकमभिसंबध्यते अधिवेदनंभार्यांतरपरिग्रहः ७३ किंच साधिविन्नापूर्ववद्देवदानमानसत्कारैर्भर्त
व्या अन्यथाभरणेमहदपुण्यंवक्ष्यमाणोदंडश्च नचभरणेसति केवलमपुण्यपरीहारः यतः यत्रदंपत्योरानुकूल्यंचित्तैक्यंतत्र धर्मार्थकामा

सुरापीव्याधिताधूर्तावंध्यार्थघ्न्यप्रियंवदा स्त्रीप्रसूश्चाधिवेत्तव्यापुरुषद्वेषिणीतथा ७३ अधि
विन्नातुभर्तव्यामहदेनोन्यथाभवेत् यत्रानुकूल्यंदंपत्योस्त्रिवर्गस्तत्रवर्धते ७४ मृतेजीवतिवापत्यौया
नान्यमुपगच्छति सेहकीर्तिमवाप्नोतिमोदतेचोमयासह ७५ आज्ञासंपादिनीदक्षांवीरसूंप्रियवादि
नीं त्यजन्दाप्यस्तृतीयांशमद्रव्योभरणंस्त्रियाः ७६

नांप्रतिदिनमभिवृद्धिः ७४ स्त्रियंप्रत्याह याभर्तरिजीवतिमृतेवा
याचापत्यादन्यंपुरुषंनैवोपगच्छति सेहलोकेविपुलांकीर्तिमवाप्नोति उमयाचसहक्रीडति पुण्यप्रभावादमुत्रेति ७५ अधिवेदनकारणाभा
वे अधिवेत्तारंप्रत्याह आज्ञासंपादिनीमादेशसंपादिनीं दक्षांशीघ्रकारिणींवीरसूंपुत्रवतींप्रियवादिनींमधुरभाषिणींयस्त्यजति अधिविंदति
सराज्ञाधनस्यतृतीयांशंदाप्यः निर्धनस्तुभरणंग्रासाच्छादनादिदाप्यः ७६ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रीधर्मानाह स्त्रीभिः सदा भर्तृवचनं कार्यं यस्मादयमेव स्त्रिया उत्कृष्टो धर्मः स्त्रीणां स्वर्गहेतुत्वात् यदा तु महापातकदूषितस्तदा आशुद्धेः-
संप्रतीक्ष्यः न तत्पारतंत्र्यं उत्तरकालं तु पूर्ववदेव तत्पारतंत्र्यम् ७७ शास्त्रीयदारसंग्रहस्य फलमाह लोके आनंत्यं वंशस्याविच्छेदः दिवः प्राप्ति
श्च दारसंग्रहस्य प्रयोजनं कथमित्याह पुत्रपौत्रप्रपौत्रकैः लोकानंत्यमग्निहोत्रादिभिश्च स्वर्गप्राप्तिरित्यन्वयः यस्मात् स्त्रीभ्य एतत् द्वयं भवति
तस्मात् स्त्रियः सेव्या उपभोग्याः प्रजार्थं रक्षितव्याश्च धर्मार्थं तथा चापस्तंबेन धर्मप्रजासंपत्तिः प्रयोजनं दारसंग्रहस्योक्तं धर्मप्रजासंपन्नेषु दा

स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः ७७ लोकानंत्यं दि
वः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः यस्मात्तस्मात्स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः ७८ षोडशर्तुनिशाः स्त्रीणां त
स्मिन्युग्मासु संविशेत् ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत् ७९

रेषु नान्यां कुर्वीतेति वदता रतिफलं तु लौकिकमेव
७८ पुत्रोत्पत्त्यर्थं स्त्रियः सेव्या इत्युक्तं तत्र विशेषमाह स्त्रीणां गर्भधारणयोग्यावस्थोपलक्षितः कालः ऋतुः स च रजोदर्शनदिवसादारभ्य षो
डशाहोरात्राणि एतस्मिन् ऋतौ युग्मासु समासु रात्रिषु रात्रिग्रहणाद्दिवसप्रतिषेधः संविशेद्गच्छेत् पुत्रार्थं युग्मासु इति बहुवचनं समुच्चयार्थं
अतश्चैकस्मिन्नपि ऋतौ अप्रतिषिद्धासु युग्मासु सर्वासु रात्रिषु गच्छेत् एवं गच्छन्ब्रह्मचार्येव भवति अतो यत्र ब्रह्मचर्यं श्राद्धादौ चोदितं तत्र ग १३
च्छतोपि न ब्रह्मचर्यस्खलनदोषोस्ति किंच पर्वाण्याद्याश्चतस्रो वर्जयेत् पर्वाणीति बहुवचनाद्यथार्थावगमादष्टमीचतुर्दश्योर्ग्रहणम् यथाह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनुः अमावास्यामष्टमींचपौर्णमासींचतुर्दशीम् ब्रह्मचारीभवेन्नित्यमप्यृतौस्नातकोद्विजइति अतोमावास्यादीनिरजोदर्शनादारभ्यचत स्रोरात्रीश्चवर्जयेत् ७९ किंच एवमुक्तेनप्रकारेणस्त्रियंगच्छन्क्षामांगच्छेत् क्षामताचतस्मिन्कालेरजस्वलाव्रतेनैव भवति अथचेन्नभ वतितदाकर्तव्याक्षामतापुत्रोत्पत्त्यर्थं अल्पास्निग्धभोजनादिना पुमान्पुंसोधिकेशुक्रेस्त्रीभवत्यधिकेस्त्रियाइतिवचनात् यदायुग्मायामपि

एवंगच्छन्स्त्रियंक्षामांमघांमूलंचवर्जयेत्
सुस्थइंदौसकृत्पुत्रंलक्षण्यंजनयेत्पुमान् ८०

रात्रौशोणिताधिक्यंनदास्त्र्येवपुरुषाकृतिः अयुग्मायामपिशुक्राधिक्येपुमानेवभवतिस्त्र्याकृतिः कालस्यनिमित्तत्वात् शुक्रशोणितयोश्चोपा- दानकारणत्वेनप्राबल्यात् तस्मात्क्षामाकर्तव्या मघामूलनक्षत्रेचवर्जयेत् चंद्रेचैकादशादिशुभस्थानगतेचकारात्पुंनक्षत्रशुभयोगलग्नादि संपत्तौसकृदेकस्यांरात्रौनद्विस्त्रिर्वा ततोलक्षणैर्युक्तंपुत्रंजनयति पुमानप्रतिहतपुंस्त्वः ८० ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमृतौनियममुक्त्वाइदानीमनृतौनियममाह भार्यायाइच्छानतिक्रमेणप्रवृत्तिरस्यास्तीतियथाकामीभवेत् वाशब्दोनियमांतरपरिग्रहा
र्थः नपूर्वनियमनिवृत्त्यर्थः स्त्रीणांवरमिंद्रदत्तमनुस्मरन् भवतीनांकामविहंतापातकीस्यादिति यथाता अब्रुवन् वरंवृणामहै ऋत्वियात्प्र
जांविंदामहैकाममाविजनितोः संभवामेति तस्मादृत्वियात्स्त्रियः प्रजांविंदंते काममाविजनितोः संभवंतिवरंवृतंतासामिति अपिच स्वदा
रेष्वेवनिरतः नितरांतन्मनस्कोभवेदित्यनुषज्जते एवकारेणस्त्र्यंतरगमनंनिवर्तयति प्रायश्चित्तस्मरणात् उभयत्रापिदृष्टप्रयोजनमाह स्त्रि-
योरक्ष्यायतः स्मृताइति यस्मात्स्त्रियोरक्ष्याः स्मृताउक्ताः कर्तव्याश्चसुरक्षिताइति तच्चसुरक्षितत्वंयथाकामित्वेनस्त्र्यंतरागमनेनभवतीति अ-

यथाकामीभवेद्वापिस्त्रीणांवरमनुस्मरन् स्वदारनिरतश्चैवस्त्रियोरक्ष्यायतः स्मृताः ८१

त्राह तस्मिन्युग्मासुसंविशेदिति किमयंविधिर्नियमः परिसंख्यावा उच्यते नतावद्विधिः प्राप्तार्थत्वात् नापिपरिसंख्यादोषत्रयसमासक्तेः
अतोनियमंप्रतिपेदिरेन्यायविदः कः पुनरेषांभेदः अत्यंताप्राप्तप्रापणंविधिः यथाग्निहोत्रंजुहुयादष्टकाः कर्तव्याइति पक्षेप्राप्तस्याप्राप्तपक्षांत
रप्रापणंनियमः यथासमेयजेतेति दर्शपूर्णमासाभ्यांयजेतेति यागः कर्तव्यतयाविहितः सचदेशमंतरेणकर्तुमशक्यइत्यर्थाद्देशः प्राप्तः सचसमो
विषमश्चेतिद्विविधः यदायजमानः समेयियक्ष्यतेतदासमेयजेतेतिवचनमुदास्तेस्वार्थस्यप्राप्तत्वात् यदातुविषमेदेशेयियक्ष्यतेतदासमेयजेते १४
पंक्तिः ४ विधिरत्यंतमप्राप्तौनियमः पाक्षिकेविधिः तत्रचान्यत्रवाप्राप्तौपरिसंख्यानिगद्यते.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिस्वार्थंविधत्ते स्वार्थस्यतदानीमप्राप्तत्वात् विषमदेशनिवृत्तिस्त्वार्थिकीचोदितदेशेनैवयागनिष्पत्तेः अचोदितदेशोपादानेनयथाशास्त्रंयागो
नानुष्ठितःस्यादिति तथाप्राङ्मुखोन्नानिभुंजीतेति इदमपिस्मार्तमुदाहरणंपूर्वेणव्याख्यातं एकस्यानेकत्रप्राप्तस्यान्यतोनिवृत्त्यर्थमेकत्रपुन
र्वचनंपरिसंख्या तद्यथा इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्तइत्ययंमंत्रः स्वसामर्थ्यादश्वाभिधान्यागर्दभाभिधान्याश्चरशनायाग्रहणेविनियुक्तः
पुनरश्वाभिधानीमादत्तइत्यनेनाश्वाभिधान्यांविनियुज्यमानोगर्दभाभिधान्यानिवर्तते तथापंचपंचनखाभक्ष्याइत्यत्रहियदृच्छयाश्वादिषुश
शादिषुचभक्षणंप्राप्तं पुनःशशादिषुश्रूयमाणंश्वादिभ्योनिवर्ततइति किंपुनरत्रयुक्तं परिसंख्येत्याह तथाहि कृतदारसंग्रहस्यस्वेच्छयैवर्तौ-
गमनंप्राप्तमितिनविधेरयंविषयः नापिनियमस्य गृह्यस्मृतिविरोधात् एवंहिस्मरंतिगृह्यकाराः दारसंग्रहानंतरंत्रिरात्रंद्वादशरात्रंसंवत्स-
रंवाब्रह्मचारीस्यादिति तत्रद्वादशरात्रात्संवत्सराद्वापूर्वमेवऋतुसंभवेऋतौगच्छेदेवेतिनियमाद्ब्रह्मचर्यस्मरणंबाध्येत अपिचप्राप्तेभावार्थैव
चनंविशेषणपरंयुक्तं प्राप्तंचर्तौभार्यागमनमिच्छयैवातोयदिगच्छेदृतावेवेतिवचनव्यक्तिर्युक्ता किंच नैयमिकात्पुत्रोत्पत्तिविधेरेवऋतौ
गमनंनित्यंप्राप्तमेवेतिऋतौगच्छेदेवेतिनियमोनर्थकःस्यात् नियमेचादृष्टंकल्पनीयं किंच ऋतौगंतव्यमेवेतिनियमेअसन्निहितस्यव्याध्यादि
नाअसमर्थस्यानिच्छोश्चाशक्योर्थउपदिष्टःस्यात् विध्यनुवादविरोधश्चनियमे तथाह्येकःशब्दःसकृदुच्चरितस्तमेवार्थंपक्षेअनुवदति पक्षे
विधत्तेचेति तस्मादृतावेवगच्छेन्नान्यत्रेतिपरिसंख्यैवयुक्ता तदिदंभारुचिविश्वरूपादयोनानुमन्यंते यतोनियमएवयुक्तःपक्षेस्वार्थवि
धिसंभवात् अगमनेदोषश्रवणाच्च ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति घोरायांभ्रूणहत्यायांयुज्यतेनात्रसंशयइति नचविध्यनुवा
दविरोधः अनुवादाभावाद्विध्यर्थत्वाच्चवचनस्य तत्रहिविध्यनुवादविरोधः यत्रविधेयावधितयातदेवानुवेदितव्यमप्राप्ततयान्योद्देशोनवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धातव्यंच यथावाजपेयाधिकरणपूर्वपक्षेवाजपेयेनस्वाराज्यकामोयजेतेतिवाजपेयलक्षणगुणविधानावधित्वेनयागोनुवेदितव्यः सएव
स्वाराज्यलक्षणफलोद्देशेनविधातव्यश्चेति नचानुवादेनेहकृत्यमस्ति यत्तुनियमेदृष्टंकल्प्यमित्युक्तंतत्परिसंख्यायामपिसमानं अनृतौग
च्छतोदोषकल्पनात् यत्तुनैयमिकपुत्रोत्पादनविध्याक्षेपेणैवऋतौनित्यगमनप्राप्तेर्नेनियमइतितदसत् सएवायंनैयमिकपुत्रोत्पादनवि-
धिःस्यात् मतमेवंगच्छन्स्त्रियंक्षामांलक्षण्यंपुत्रंजनयेदितिस्त्र्यभिगमनातिरिक्तःपुत्रोत्पादनविधिरिति तन्न गमनकरणिकायाभाव-
नायाएवपुत्रोत्पत्तिकर्मताप्रदर्श्यते एवंगच्छन्लक्षण्यंपुत्रंजनयेदित्यनेन यथाग्निहोत्रंजुह्वन्स्वर्गंभावयेदितिनचासंनिहितादेरशक्या-
र्थविधिप्रसंगः सन्निहितशक्तयोरेवोपदेशात् ऋतुस्नातांतुयोभार्यांसंनिधौनोपगच्छतीति यः स्वदारानृतुस्नातान्स्वस्थः सन्नोपगच्छती
तिविशेषोपादानात् अनिच्छानिवृत्तिस्तुनियमविधानादेव नचविशेषणपरतापिपक्षेप्राप्तार्थविधिसंभवात् नापिगृह्यस्मृतिविरोधः संवत्स
रात्पूर्वमेवऋतुदर्शनेसंविशतोनब्रह्मचर्यस्खलनदोषः यथाश्राद्धादिषु तस्मात्स्वार्थहानिपरार्थकल्पनाप्राप्तबाधलक्षणदोषत्रयवतीपरि
संख्यानयुक्ता पंचपंचनखाभक्ष्याइत्यत्रयद्यपिशशादिषुभक्षणस्यपक्षेप्राप्तेर्नियमः शशादिषुश्वादिषुचप्राप्तेःपरिसंख्येत्युभयसंभवःत
थापिनियमपक्षेशशाद्यभक्षणेदोषप्रसंगः श्वादिभक्षणेचादोषप्रसंगेनप्रायश्चित्तस्मृतिविरोधइतिपरिसंख्यैवाश्रिता एतेनसायंप्रातर्द्वि
जातीनामशनंस्मृतिनोदितमित्यत्रापिनियमोव्याख्यातः नांतराभोजनंकुर्यादितिचपुनरुक्तंस्यात्परिसंख्यायामेवंचनियमेसतिऋता
वृतावितिवीप्सालभ्यते निमित्तावृत्तौनैमित्तिकमप्यावर्ततइतिन्यायात् यथाकामीभवेदित्यपिनियमएव अनृतावपिस्त्रीकामनायांसत्यां ९५
स्त्रियमभिरमयेदेवेति ऋतावुपेयात्सर्वत्रवाप्रतिषिद्धवर्ज्यमित्येतदपिगौतमीयसूत्रद्वयंनियमपरमेव ऋतावुपेयादनृतावपिस्त्रीकाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नार्यां प्रतिषिद्धवर्जमुपेयादेवेत्यलमतिप्रसंगेन ८१ किंच भर्तृप्रभृतिभिः पूर्वोक्ताः साध्व्यः स्त्रियो यथाशक्त्यलंकारवसनभोजनपुष्पादिभिः संमाननीयाः यस्मात्ताः पूजिताः धर्मार्थकामान्संवर्धयंति ८२ तया पुनः समर्पितगृहव्यापारया किंभूतया भवितव्यमित्याह संयतः स्वस्थाननिवेशितः उपस्करो गृहोपकरणवर्गो यया सा तथोक्ता यथोलूखलमुसलशूर्पादेः कंडनस्थाने दृषदुपलयोरवियोगेन पेषणस्थान इत्यादि दक्षा गृहव्यापारकुशला हृष्टा सदैव प्रहसितानना व्ययपराङ्मुखी न व्ययशीला स्यादिति सर्वत्र शेषः किंच श्वश्रूश्च श्वशुरश्च श्वशुरौ श्वशुरः श्वश्र्वेत्येक

भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः बंधुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ८३ संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी कुर्याच्छ्वशुरयोः पादवंदनं भर्तृतत्परा ८३ क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ८४ रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्धके अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क्वचित्स्त्रियाः ८५

शेषः तयोः पादवंदनं नित्यं कुर्यात् श्वशुरग्रहणं मान्यांतरोपग्रहणार्थं भर्तृतत्परा भर्तृवशवर्तिनी सती पूर्वोक्तं कुर्यात् भर्तृसन्निधावुक्तं ८३ प्रोषिते भर्तरि तया किं कर्तव्यमित्याह देशांतरगतभर्तृका क्रीडां कंदुकादिभिः शरीरसंस्कारमुद्वर्तनादिभिः समाजो जनसमूहः उत्सवो विवाहादिः तयोर्दर्शनं हास्यं विश्रंभणं परगृहगमनं त्यजेदिति प्रत्येकं संबंध्यते ८४ किंच पाणिग्रहणात्प्राक् पिता कन्यामकार्यकरणाद्रक्षेत् न तत ऊर्ध्वं भर्ता तदभावे पुत्राः वृद्धाभावे च तेषामुक्तानामभावे ज्ञातयः ज्ञातीनामभावे राजा पक्षद्वयावसाने तु राजा भर्ता प्रभुः स्त्रिया इति वचनात् अतः क्वचिदपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रीणांनैवस्वातंत्र्यम् ८५ किंच भर्त्रा विनाभर्तृरहिता पित्रादिरहितानस्यात् यस्मात्तद्रहितागर्हणीयानिंद्याभवेत् एतच्चब्रह्मचर्यपक्षे - भर्तरिप्रेतेब्रह्मचर्यंतदन्वारोहणंवेतिविष्णुस्मरणात् अन्वारोहणेमहानभ्युदयः तथाचव्यासः कपोतिकाख्यानव्याजेनदर्शितवान् पतिव्रतासुसंदीप्तंप्रविवेशहुताशनं तत्रचित्रांगदधरंभर्तारंसान्वपद्यत ततः स्वर्गगतः पक्षीभार्ययासहसंगतः कर्मणापूजितस्तत्ररेमेचसहभार्ययेति तथाचशंखांगिरसौ तिस्रःकोट्योर्धकोटीचयानिलोमानिमानुषे तावत्कालंवसेत्स्वर्गेभर्तारंयानुगच्छतीतिप्रतिपाद्यतयोरवियोगंदर्शयतः व्यालग्राहीयथासर्पंबलादुद्धरतेबिलात् तद्वदुद्धृत्यसानारीसहतेनैवमोदते तत्रसाभर्तृपरमास्तूयमानाप्सरोगणैः क्रीडतेपतिनासार्द्धंयावदिंद्राश्चतुर्द

पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः हीनानस्याद्विनाभर्त्रागर्हणीयान्यथाभवेत् ८६

शेति तथा ब्रह्मघ्नोवाथमित्रघ्नः कृतघ्नोवाभवेत्पतिः पुनात्यविधवानारीनमादायमृतातुया तथाहारीतः मृतेभर्तरियानारीसमारोहेद्धुताशनम् सारुंधतीसमाचारास्वर्गलोकेमहीयते यावच्चाग्नौमृतेपत्यौस्त्रीनात्मानंप्रदाहयेत् तावन्नमुच्यतेसाहिस्त्रीशरीरात्कथंचनेति हारीतोपि मातृकंपैतृकंचापियत्रचैवप्रदीयते कुलत्रयंपुनात्येषाभर्तारंयानुगच्छतीति तथा आर्त्तार्त्तेमुदितेहृष्टाप्रोषितेमलिनाकृशा म्रितेम्रियेत यापत्यौसास्त्रीज्ञेयापतिव्रतेति अयंसर्वासांस्त्रीणामगर्भिणीनामबालापत्यानां आचांडालानांसाधारणोधर्मः भर्तारंयानुगच्छतीत्यवि- १६
शेषोपादानात् यानिचब्राह्मण्यनुगमननिषेधपराणिवाक्यानि मृतानुगमनंनास्तिब्राह्मण्याब्रह्मशासनात् इतरेषुतुवर्णेषुतपः परम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुच्यते जीवंतीतद्धितंकुर्यान्मरणादात्मघातिनी यास्त्रीब्राह्मणजातीयामृतंपतिमनुव्रजेत् सास्वर्गमात्मघातेननात्मानंनपतिंनयेत् इ-
त्येवमादीनितानिपृथक्चितिसमारुह्यनविप्रागंतुमर्हतीतिविशेषस्मरणात् अनेनक्षत्रियादिस्त्रीणांपृथ
क्चित्यभ्यनुज्ञागम्यते यत्तुकेश्चिदुक्तं पुरुषाणामिवस्त्रीणामप्यात्महननस्यप्रतिषिद्धत्वादतिप्रवृद्धस्वर्गाभिलाषायाः प्रतिषेधशास्त्रमति
क्रामंत्या अयमनुगमनोपदेशः श्येनवत् यथाश्येनेनाभिचरन्यजेतेतितीव्रक्रोधाक्रांतस्वांतस्यप्रतिषेधशास्त्रमतिक्रामतः श्येनोपदेश
इतितदयुक्तं येतावत् श्येनकरणिकायांभावनायांभाव्यभूतहिंसायांविधिसंस्पर्शाभावेनप्रतिषेधसंस्पर्शात् फलद्वारेणश्येनस्यानर्थत्वंवर्ण
यंति तेषांमतेहिंसाया एवस्वर्गार्थतया अनुगमनेनशास्त्रेणविधीयमानत्वात्प्रतिषेधसंस्पर्शाभावादग्नीषोमीयवत् स्पृष्टमेवानुगमनस्यश्येन
वैषम्यं यत्तुमतंहिंसानामपरमरणानुकूलोव्यापारः श्येनश्चपरमरणानुकूलव्यापाररूपत्वाद्धिंसैव कामाधिकारेचकरणांशेरागतः प्रवृत्तिसंभवे
नविधेरप्रवर्तकत्वात् रागप्रयुक्तहिंसारूपत्वात् श्येनः प्रतिषिद्धः स्वरूपेणैवानर्थइति तत्राप्यनुगमनशास्त्रेणमरणस्यैवस्वर्गसाधनतया
विधानान्मरणेयद्यपिरागतः प्रवृत्तिस्तथापिमरणानुकूलेव्यापारे अग्निप्रवेशादाविति कर्तव्यतारूपेविधितएवप्रवृत्तिरितिननिषेधस्यावका
शः वायव्यंश्वेतमालभेतभूतिकामइतिवत् तस्मात्स्पष्टमेवानुगमनस्यश्येनवैषम्यं यत्तुतस्मादुहनपुरायुषः स्वः कामीप्रेयादितिश्रुतिविरो
धादनुगमनमयुक्तमिति तन्नः स्वः काम्यायुषः प्राङ्नप्रेयादितिस्वर्गफलोद्देशेनायुषः प्रागायुर्व्ययोनकर्तव्योमोक्षार्थिना यस्मादायुषः
शेषेसतिनित्यनैमित्तिककर्मानुष्ठानक्षपितांतःकरणकलंकस्यश्रवणमनननिदिध्यासनसंपत्तौसत्यामात्मज्ञानेननित्यनिरतिशयानंदब्र
ह्मप्राप्तिलक्षणमोक्षसंभवः तस्मादनित्याल्पसुखरूपस्वर्गार्थमायुषोव्ययोनकर्तव्यइत्यर्थः अतश्चमोक्षमनिच्छंत्या अनित्याल्पसुखरूप-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वर्गार्थिन्या अनुगमनं युक्तं इतरकाम्यानुष्ठानवदिति सर्वमनवद्यं ८६ किंच प्रियमनवद्यत्वेन मनोनुकूलमायत्यां च यच्छ्रेयस्करं तद्धितं
प्रियं च हितं च प्रियहितं पत्युः प्रियहितं तस्मिन् युक्ता निरता स्वाचारा शोभनः आचारो यस्याः सा तथोक्ता शोभनश्चाचारो दर्शितः शंखेन नानु
ज्ञाता गृहान्निर्गच्छेत् नानुत्तरीया नत्वरितं व्रजेत् न परपुरुषं भाषेतान्यत्र वणिक्प्रव्रजितवृद्धवैद्येभ्यो न नाभिं दर्शयेत् आगुल्फाद्वासः परिद
ध्यात् न स्तनौ विवृतौ कुर्यात् न हसेदप्रावृता भर्तारं तद्बंधून् वा न द्विष्यान्न गणिकाधूर्ताभिसारिणीप्रव्रजिताप्रेक्षणिकामायामूलकुहककारिका

पतिप्रियहिते युक्ता स्वाचारा विजितेंद्रिया सेह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम् ८७
सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा ८८

दुःशीलादिभिः सहैकत्र तिष्ठेत् संसर्गेण हि चारित्रं दुष्यतीति विजितेंद्रिया विजितानि संयमितानि इंद्रियाणि श्रोत्रादीनि वागादीनि च मनः स-
हितानि यया सा इह लोके कीर्तिं प्रख्यातिं परलोके चोत्तमां गतिं प्राप्नोति अयं च सकल एव स्त्रीधर्मो विवाहादूर्ध्वं वेदितव्यः प्रागुपनयनात्कामचार
कामवादकामभक्षा इति स्मरणात् वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृत इति ८७ अनेकभार्यं प्रत्याह सवर्णायां सत्यां अन्यामसव १७
र्णां नैव धर्मकार्यं कारयेत् सवर्णास्वपि बह्वीषु धर्म्ये विधौ धर्मानुष्ठाने ज्येष्ठया विना ज्येष्ठां मुक्त्वा इतरा मध्यमा कनिष्ठा वा न नियोक्तव्या ८८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रमीतपतिकायांविधिमुक्त्वाइदानींप्रमीतभार्यंप्रत्याह पूर्वोक्तांवृत्तवतींआचारवतींविपन्नांस्त्रियमग्निहोत्रेणश्रौतेनाग्निनातदभावेस्मार्तेन
दाहयित्वापतिः भर्ताअनुत्पादितपुत्रोनिष्टयज्ञोवाआश्रमांतरेष्वनधिकृतोवास्मृत्यंतराभावेपुनर्दारान् अग्नींश्चविधिवदाहरेत् अविलंबयन्शी
घ्रमेव अनाश्रमीनतिष्ठेतदिनमेकमपिद्विजइतिदक्षस्मरणात् एतच्चाधानेनसहाधिकृतायाएवनान्यस्याः यत्तु द्वितीयांचैवयोभार्यांदहेद्वैता
निकाग्निभिः जीवत्यांप्रथमायांतुसुरापानसमंहितदिति तथा मृतायांतुद्वितीयायांयोग्निहोत्रंसमुत्सृजेत् ब्रह्मघ्नंतंविजानीयाद्यश्चकामात्समु
त्सृजेदिति एवमादितदाधानेनसहानधिकृतायाअग्निदाहेवेदितव्यं इतिविवाहप्रकरणम् ८९ ब्राह्मणस्यचतस्रोभार्याभवंतिक्षत्रियस्य

दाहयित्वाग्निहोत्रेणस्त्रियंवृत्तवतींपतिः आहरेद्विधिवद्दारानग्नींश्चैवाविलंबयन् ८९
सवर्णेभ्यः सवर्णासुजायंतेहिसजातयः अनिंद्येषुविवाहेषुपुत्राः संतानवर्धनाः ९०

तिस्रोवैश्यस्यद्वेशूद्रस्यैकेत्युक्तातासुचपुत्राउत्पादयितव्याइत्युक्तं इदानींकस्यांकस्मात् कः पुत्रोभवतिइतिविवेकमाह सवर्णेभ्योब्राह्मणा
दिभ्यः सवर्णासुब्राह्मण्यादिषुसजातयोमातृपितृसमानजातीयाः पुत्राभवंति विन्नास्वेषविधिः स्मृतइतिसर्वशेषत्वेनोपसंहरणात् विन्नासु
सवर्णास्वितिसंबध्यते विन्नाशब्दस्यसंबंधिशब्दत्वाद्वेत्तृभ्यः सवर्णेभ्यइतिलभ्यते एकः सवर्णशब्दः स्पष्टार्थः अतश्चायमर्थः संवृत्तः उक्तेनवि
धिनाऊढायांसवर्णायांवोढुः समानादुत्पन्नः समानजातीयोभवति अतश्चकुंडगोलककानीनसहोढादीनामसवर्णत्वमुक्तंभवति तेचसव-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्णेभ्योनुलोमप्रतिलोमेभ्यश्चभिद्यमानाः साधारणधर्मैरहिंसादिभिरधिक्रियंते शूद्राणांतुसधर्माणः सर्वेपध्वंसजाः स्मृताइतिस्मरणात् अप
ध्वंसजाः व्यभिचारजाताः शूद्रधर्मैरपिद्विजशुश्रूषादिभिरधिक्रियंते ननुकुंडगोलकयोरब्राह्मणत्वेश्राद्धेप्रतिषेधोनुपपन्नः न्यायविरोधश्चयो
यज्जातीयात् यज्जातीयायामुत्पन्नः सतज्जातीयएव यथागोर्गविगोः अश्वाहूडवायामश्वः तस्माद्ब्राह्मणाद्ब्राह्मण्यामुत्पन्नोनब्राह्मणइति
विरुद्धं तथाकानीनपौनर्भवादीननुक्रम्य सजातीयेष्वयंप्रोक्तस्तनयेषुमयाविधिरितिवचनविरोधश्च नैतत्सारं ब्राह्मणेनब्राह्मण्यामुत्प-
न्नोब्राह्मणइतिभ्रमनिवृत्त्यर्थः श्राद्धेप्रतिषेधः यथात्यंतमप्राप्तस्यपतितस्यश्राद्धेप्रतिषेधः नचन्यायविरोधः यत्रप्रत्यक्षगम्याजातिर्भव-
तितत्रतथा ब्राह्मणादिजातिस्तुस्मृतिलक्षणायथास्मरणंभवति यथासमानेपिब्राह्मण्येकुंडिनोवसिष्ठोगौतमइतिस्मरणलक्षणंगोत्रं त
थामनुष्यत्वेसमानेपिब्राह्मण्यादिजातिः स्मरणलक्षणा मातापित्रोश्चैतदेवजातिलक्षणं नचानवस्था अनादित्वात्संसारस्य शब्दार्थव्यवहारव
त् सजातीयेष्वयंप्रोक्तस्तनयेषुमयाविधिरितितूक्तानुवादत्वाद्यथासंभवंव्याख्यास्यते क्षेत्रजस्तुमातृसमानजातीयोनियोगस्मरणात् शिष्ट-
समाचाराच्च यथाधृतराष्ट्रपांडुविदुराः क्षेत्रजाः संतोमातृसमानजातीयाइत्यलमतिप्रसंगेन किंच अनिंद्येषुब्राह्म्यादिषुविवाहेषुपुत्राः संतान
वर्धनाः अरोगिणोदीर्घायुषोधर्मप्रज्ञासंपन्नाभवंति ९० वर्णानुक्त्वाइदानीमनुलोमानाह ब्राह्मणात्क्षत्रियायांविन्नायामुत्पन्नोमूर्धाव-
सिक्तोहिनामपुत्रोभवति वैश्यकन्यकायांविन्नायामंबष्ठोनामभवति शूद्रायांविन्नायांनिषादोनामपुत्रोभवति निषादोनामकश्चिन्मत्स्यघा
तजीवीप्रतिलोमजः समाप्तूदितिपारसवोयंनिषादइतिसंज्ञाविकल्पः विप्रादितिसर्वत्रानुवर्तते यत्तुब्राह्मणेनक्षत्रियायामुत्पादितः क्षत्रिय
एवभवति क्षत्रियेणवैश्यायामुत्पादितोवैश्यएवभवति वैश्येनशूद्रायामुत्पादितः शूद्रएवभवतीतिशंखस्मरणं तत्क्षत्रियादिधर्मप्राप्त्यर्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नपुनर्मूर्द्धावसिक्तादिजातिनिराकरणार्थंक्षत्रियादिजातिप्राप्त्यर्थंवा अतश्चमूर्द्धावसिक्तादीनांक्षत्रियादिभिरुक्तैरेवदंडाजिनोपवीतादिभिरु
पनयनादिकार्यं प्रागुपनयनात्कामचारादिपूर्ववद्वेदितव्यम् ९१ वैश्यायांशूद्रायांचविन्नायांराजन्यान्माहिष्योग्रौ यथाक्रमंपुत्रौसंभवतः
वैश्येनशूद्रायांविन्नायांकरणोनामपुत्रोभवति एषसवर्णमूर्धावसिक्तादिसंज्ञाविधिः विन्नासूढासुस्मृतउक्तोवेदितव्यः एतेमूर्धावसिक्तांब

विप्रान्मूर्द्धावसिक्तोहिक्षत्रियायांविशःस्त्रियाम् अंबष्ठःशूद्र्यांनिषादोजातःपारसवोपि
वा ९१ वैश्याशूद्र्योस्तुराजन्यान्माहिष्योग्रौसुतौस्मृतौ वैश्यात्तुकरणःशूद्र्यांविन्नास्वेषविधिःस्मृ
तः ९२ ब्राह्मण्यांक्षत्रियात्सूतोवैश्याद्वैदेहिकस्तथा शूद्राज्जातस्तुचांडालःसर्वधर्मबहिष्कृतः ९३
क्षत्रियामागधंवैश्याच्छूद्रात्क्षत्तारमेवच शूद्रादायोगवंवैश्याजनयामासवैसुतम् ९४

ष्ठनिषादमाहिष्योग्रकरणाःषडनुलोमजाःपुत्रावेदितव्याः ९२ प्रतिलोमजानाह ब्राह्मण्यांक्षत्रियवैश्यशूद्रैरुत्पादिताः यथाक्रमंसूत
वैदेहिकचांडालाख्याःपुत्राभवंति तत्रचांडालःसर्वधर्मबहिष्कृतः ९३ किंच क्षत्रियायोषिद्वैश्यान्मागधंनामपुत्रंजनयति सैवशूद्रात्क्षत्ता
रंवैश्ययोषिच्छूद्रादायोगवंपुत्रंजनयति एतेचसूतवैदेहिकचांडालमागधक्षत्त्रायोगवाःषट्प्रतिलोमजाःएतेषांचवृत्तयःऔशनसेमानवेचद्रष्टव्याः
९४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संकीर्णसंकरेजात्यंतरमाह क्षत्रियेणवैश्यायामुत्पादितोमाहिष्यः वैश्येनशूद्रायामुत्पादिताकरणीतस्यांमाहिष्येणोत्पादितोरथकारोनामजा
त्याभवति तस्यचोपनयनादिसर्वंकार्यम् वचनात् यथाहशंखः क्षत्रियवैश्यानुलोमानंतरोत्पन्नजोरथकारस्तस्येज्यादानोपनयनसंस्कार
क्रियाअश्वप्रतिष्ठारथसूत्रवास्तुविद्याध्ययनवृत्तिताचेति एवंब्राह्मणक्षत्रियोत्पन्नमूर्धावसिक्तमाहिष्याद्यनुलोमसंकरेजात्यंतरतोपनयना
दिप्राप्तिश्चवेदितव्या तयोर्द्विजातित्वात् संज्ञास्तुस्मृत्यंतरोक्ताद्रष्टव्याः एतच्चप्रदर्शनमात्रमुक्तं संकीर्णसंकरजातीनामानंत्याद्वक्तुमशक्यत्वा

माहिष्येणकरण्यांतुरथकारःप्रजायते असत्संतस्तुविज्ञेयाःप्रतिलोमानुलोमजाः ९५
जात्युत्कर्षोयुगेज्ञेयःपंचमेसप्तमेपिवा व्यत्ययेकर्मणांसाम्यंपूर्ववच्चाधरोत्तरम् ९६

दतएतावदत्रविवक्षितं असंतःप्रतिलोमजाः संतश्चानुलोमजाज्ञातव्याइति ९५ सवर्णेभ्यःसवर्णासुजायंतइत्यादिनावर्णप्राप्तौकारण
मुक्तमिदानींकारणांतरमाह जातयोमूर्धावसिक्ताद्यास्तासामुत्कर्षोब्राह्मणत्वादिजातिप्राप्तिर्जात्युत्कर्षोयुगेजन्मनिसप्तमेपंचमेअपिशब्दात्षष्ठे
वाबोद्धव्यः व्यवस्थितश्चायंविकल्पः व्यवस्थाचब्राह्मणेनशूद्रायामुत्पादितानिषादीसाब्राह्मणेनोदादुहितरंकांचिज्जनयति सापिब्राह्मणेनो ५९
दा अन्यामित्यनेनप्रकारेणषष्ठीसप्तमंब्राह्मणंजनयति ब्राह्मणेनवैश्यायामुत्पादिता अंबष्ठासाप्यनेनप्रकारेणपंचमीषष्ठंब्राह्मणंजनयति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूर्धावसिक्तापिअनेनप्रकारेणचतुर्थेपंचमंब्राह्मणमेवजनयति एवमुग्राक्षत्रियेणोढामाहिष्याचयथाक्रमंक्षत्रियंषष्ठंपंचमंजनयति-
तथाकरणीवैश्योढापंचमंवैश्यमित्येवमन्यत्राप्यूहनीयम् किंच कर्मणांव्यत्ययेवृत्त्यर्थानांकर्मणांविपर्यासेयथाब्राह्मणोमुख्यवृत्त्याअजीव
न्क्षात्रेणकर्मणाजीवेदित्यनुकल्पः तेनाप्यजीवन्वैश्यवृत्त्यातयाप्यजीवन्शूद्रवृत्त्याक्षत्रियोपिस्वकर्मणाजीवनार्थेनाजीवन्वैश्यवृत्त्याशू
द्रवृत्त्यावा वैश्योपिस्ववृत्त्याअजीवन्शूद्रवृत्त्येतिकर्मणांव्यत्ययः तस्मिन्व्यत्ययेसतियद्यापद्विमोकेपितांवृत्तिंनपरित्यजति तदापंचमेषष्ठेसप्तमे-
वाजन्मनिसाम्यं यस्यहीनवर्णस्यकर्मणाजीवतितत्समानजातित्वंभवति तद्यथा ब्राह्मणः शूद्रवृत्त्याजीवन्तामपरित्यजन् यंपुत्रमुत्पादय-
तिसोपितयैववृत्त्याजीवन्पुनरप्येवंपरंपरयासप्तमेजन्मनिशूद्रमेवजनयति वैश्यवृत्त्याजीवन्षष्ठेवैश्यं क्षत्रियवृत्त्याजीवन् पंचमेक्षत्रियम्
क्षत्रियोपिशूद्रवृत्त्याजीवन्षष्ठेशूद्रं वैश्यवृत्त्याजीवन्पंचमेवैश्यम् वैश्योपिशूद्रवृत्त्याजीवन्तामरित्यजन्पुत्रपरंपरयापंचमेजन्मनिशूद्रंज
नयति पूर्ववच्चाधरोत्तरं अस्यार्थः वर्णसंकरेअनुलोमजाःप्रतिलोमजाश्चदर्शिताः संकीर्णसंकरजाश्चरथकारनिदर्शनेनदर्शिताः इदा
नींवर्णसंकरजाताः प्रदर्श्यंते अधरेचउत्तरेचअधरोत्तरं यथामूर्धावसिक्तायांक्षत्रियवैश्यशूद्रैरुत्पादितास्तथाबष्ठायांवैश्यशूद्राभ्यांनि
षाद्यांशूद्रेणोत्पादिताअधराःप्रतिलोमजास्तथामूर्धावसिक्तांबष्ठानिषादीषुब्राह्मणोत्पादिताः माहिष्योग्रयोर्ब्राह्मणेनक्षत्रियेणचोत्पादि
ताः करण्यांब्राह्मणेनक्षत्रियेणवैश्येनचोत्पादिताः उत्तरेअनुलोमजाः एवमन्यत्राप्यूहनीयम् एतदधरोत्तरंपूर्ववदसत्सदितिबोद्धव्यम्
इतिवर्णजातिविवेकप्रकरणम् ९६ श्रौतस्मार्तानिकर्माणिअग्निसाध्यानिदर्शयिष्यन्कस्मिन्नग्नौकिंकर्तव्यमित्याह स्मृत्युक्तंवैश्वदे
वादिकंकर्मलौकिकंचयत्प्रतिदिनंपाकलक्षणंतदपिगृहस्थोविवाहाग्नौविवाहसंस्कृतेकुर्वीत विभागकालाद्वातेवावैश्यकुलादग्निमानीयेत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनोक्तसंस्कारसंस्कृते अपिशब्दात्स्त्रेतेवागृहपतावाहृतेसंस्कृतएव ततश्च कालत्रयातिक्रमेप्रायश्चित्तीयते श्रुत्युक्तमग्निहोत्रादिकंकर्मवै-तानिकाग्निषुआहवनीयादिषुकुर्वीत ९७ गृहस्थधर्मानाह शरीरचिंतांआवश्यकांदिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखइत्याद्युक्त-विधिनानिर्वर्त्यगंधलेपक्षयकरमित्यादिनोक्तेनविधिनाकृतशौचविधिर्द्विजः दंतधावनपूर्वकंप्रातःसंध्यामुपासीत दंतधावनविधिश्च कंटक-क्षीरवृक्षोत्थंद्वादशांगुलसंमितम् कनिष्ठिकाग्रवत्स्थूलंपर्वार्धकृतकूर्चकं दंतधावनमुद्दिष्टंजिह्वोल्लेखनिकातथेति अत्रवृक्षोत्थमित्यनेनतृण

कर्मस्मार्तंविवाहाग्नौकुर्वीतप्रत्यहंगृही दायकालाहृतेवापिश्रौतंवैतानिकाग्निषु ९७ शरीरचिंतांनिर्वर्त्यकृ-
तशौचविधिर्द्विजः प्रातःसंध्यामुपासीतदंतधावनपूर्वकम् ९८ हुत्वाग्नीन्सूर्यदैवत्यान्जपेन्मंत्रान्समाहितः
वेदार्थानधिगच्छेच्चशास्त्राणिविविधानिच ९९

लोष्ठांगुल्यादिनिषेधः पलाशाश्वत्थादिनिषेधश्चस्मृत्यंतरोक्तोद्रष्टव्यः दंत-धावनमंत्रश्च आयुर्बलंयशोवर्चः प्रजाःपशुवसूनिच ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पतेइति ब्रह्मचारिप्रकरणोक्तस्यापिसंध्यावंदनस्यपुनर्वचनं दंतधावनपूर्वकत्वप्रतिपादनार्थम् दंतधावनंनृत्यगीतादिब्रह्मचारीवर्जयेदितितन्निषेधात् ९८ प्रातःसंध्यावंदनानंतरं अग्नीनाहवनीयादीन्यथो-क्तेनविधिनाहुत्वाऔपासनाग्निंवातदनंतरंसूर्यदैवत्यान्उदुत्यंजातवेदसमित्यादीन्मंत्रान्जपेत् समाहितः अविक्षिप्तचित्तः तदनंतरंवेदार्थान्निरुक्तव्या-करणादिश्रवणेनाधिगच्छेज्जानीयात् चकारादधीतंचाभ्यसेत् विविधानिचशास्त्राणिमीमांसाप्रभृतीनिधर्मार्थारोग्यप्रतिपादकान्यधिगच्छेत् ९९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदनंतरमीश्वरमभिषेकादिगुणयुक्तमन्यंवाश्रीमंतं अकुत्सितंयोगक्षेमार्थं अलब्धलाभोयोगः लब्धपरिपालनंक्षेम तदर्थमुपेयादुपासीत
उपेयादित्यनेनसेवांप्रतिषेधति वेतनग्रहणेनाज्ञाकरणंसेवा तस्याःश्ववृत्तित्वेननिषेधात् ततोमध्यान्हेशास्त्रोक्तेनविधिनानद्यादिषुस्नात्वादेवा
न्स्वगृह्योक्तान् पितॄंश्चचकारादृषींश्चदेवादितीर्थेनतर्पयेत् तदनंतरंगंधपुष्पाक्षतैः हरिहरहिरण्यगर्भप्रभृतीनामन्यतमंयथावासनंऋग्यजुःसा
ममंत्रैस्तत्प्रकाशकैःस्वनामभिर्वाचतुर्थ्यंतैर्नमस्कारयुक्तैराराधयेत् यथोक्तविधिना १०० तदनंतरंवेदाथर्वेतिहासपुराणानिसमस्तानिव्य

उपेयादीश्वरंचैवयोगक्षेमार्थसिद्धये स्नात्वादेवान्पितॄंश्चैवतर्पयेदर्चयेत्तथा १०० वेदाथर्वपुराणानि
सेतिहासानिशक्तितः जपयज्ञप्रसिद्ध्यर्थंविद्यांचाध्यात्मिकींजपेत् १०१ बलिकर्मस्वधाहोमस्वाध्या
यातिथिसत्क्रियाः भूतपित्रमरब्रह्ममनुष्याणांमहामखाः १०२

स्तानिवाआध्यात्मिकींचविद्यांजपयज्ञसिद्ध्यर्थंयथोक्ते
नविधिनायथाशक्तिजपेत् १०१ बलिकर्मभूतयज्ञः स्वधापितृयज्ञः होमोदेवयज्ञः स्वाध्यायोब्रह्मयज्ञः अतिथिसत्क्रियामनुष्ययज्ञः एतेपं
चमहायज्ञाअहरहःकर्तव्याः नित्यत्वात् यत्पुनरेषांफलश्रवणंतदेषांपावनत्वंख्यापनार्थंनकाम्यप्रतिपादनाय १०२ स्वगृह्योक्तेनविधिनावै
श्वदेवहोमंकृत्वातदवशिष्टेनान्नेनभूतेभ्योबलिंहरेत् अन्नग्रहणमपक्वव्युदासार्थं तदनंतरंयथाशक्तिभूमावन्नंश्वचांडालवायसेभ्योनिक्षि
पेत् चशब्दात्कृमिपापरोगिपतितेभ्यः यथाहमनुः शुनांचपतितानांचश्वपचापापरोगिणाम् वायसानांकृमीणांचशनकैर्निक्षिपेद्भुवीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतच्चसायंप्रातः कर्तव्यं अथसायंप्रातःसिद्धस्यहविष्यस्यजुहुयादित्याश्वलायनस्मरणात् इहकेचिद्वैश्वदेवाख्यस्यकर्मणःपुरुषार्थत्वमन्न
संस्कारकर्मत्वंचेच्छंति अथसायंप्रातःसिद्धस्यहविष्यस्यजुहुयादित्यन्नसंस्कारकर्मताप्रतीयते अथातःपंचमहायज्ञाइत्युपक्रम्य तानेतानह
रहः कुर्वीतेतिनित्यत्वाभिधानात्पुरुषार्थत्वंचावगम्यतइति तदयुक्तं पुरुषार्थत्वेन्नसंस्कारकर्मत्वानुपपत्तेः तथाहि द्रव्यसंस्कारकर्मत्वपक्षेन्ना
र्थतावैश्वदेवकर्मणःपुरुषार्थत्वेवैश्वदेवकर्मार्थताद्रव्यस्येतिपरस्परविरोधात्पुरुषार्थत्वमेवयुक्तं महायज्ञेश्चयज्ञैश्चब्राह्मीयंक्रियतेतनुरितित

देवेभ्यश्चहुतादन्नाच्छेषाद्भूतबलिंहरेत् अन्नंभूमौश्वचांडालवायसेभ्यश्चनिक्षिपेत् १०३ अन्नंपितृमनुष्येभ्यो
देयमप्यन्वहंजलम् स्वाध्यायंचान्वहंकुर्यान्नपचेदन्नमात्मने १०४ बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः सं
भोज्यातिथिभृत्यांश्चदंपत्योःशेषभोजनम् १०५

थावैश्वदेवेनिवृत्तेतुयदन्योतिथिराव्रजेत् तस्माअन्नंयथाशक्तिप्रदद्या
न्नबलिंहरेदितिमनुस्मरणात् पुरुषार्थत्वेवैश्वदेवाख्यंकर्मनप्रतिपाकमावर्तनीयं तस्मादथसायंप्रातरित्यादिनोत्पत्तिप्रयोगौदर्शितौ तानेतान्यज्ञान
हरहः कुर्वीतेतिअधिकारविधिरितिसर्वमनवद्यं १०३ प्रत्यहमन्नंपितृभ्योमनुष्येभ्यश्चयथाशक्तिदेयं अन्नाभावेकंदमूलफलादि तस्याप्यभावेजलंदे
यं अपिशब्दात्स्वाध्यायंसततंकुर्यात् अविस्मरणार्थं नपचेदन्नमात्मार्थंअन्नग्रहणंसकलादनीयद्रव्यप्रदर्शनार्थं कथंतर्हिदेवतोद्देशेनैव १०४ परिणी
तापितृगृहेस्थितास्ववासिनी शेषाःप्रसिद्धाः बालादीनतिथिभृत्यांश्च संभोज्यभोजयित्वादंपत्योःशेषभोजनंकर्तव्यं १०५ ६२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुंजानेनद्विजन्मनाउपरिष्टादधस्ताच्चापोशनाख्येनकर्मणान्नमनग्नममृतंचकार्यं द्विजन्मग्रहणमुपनयनप्रभृतिसर्वाश्रमसाधारण्यार्थं अतिथि
त्वेनवर्णानांदेयंशक्त्यानुपूर्वशः अप्रणोद्योतिथिःसायमपिवाग्भूतृणोदकैः वैश्वदेवानंतरंवर्णानांब्राह्मणप्रभृतीनांअतिथित्वेनयुगपत्प्राप्तानांब्राह्मणा
द्यानुपूर्व्येणयथाशक्तिदेयं सायंकालेपियद्यतिथिरागच्छति तदा असावप्रणोद्यः अप्रत्याख्येयएव तथाहमनुः तृणानिभूमिरुदकंवाक्चतुर्थीचसू
नृता एतान्यपिसतांगेहेनोच्छिद्यंतेकदाचनेति यद्यप्यदनीयंकिमपिनास्तितथापिवाग्भूतृणोदकैरपिसत्कारंकुर्यात् १०६ भिक्षवेसामान्येनभिक्षादात-

आपोशनेनोपरिष्टादधस्तादश्नतातथा अनग्नममृतंचैवकार्यमन्नंद्विजन्मना १०६ सत्कृत्यभिक्षवेभि
क्षादातव्यासुव्रतायच भोजयेच्चागतान्कालेसखिसंबंधिबांधवान् १०७ महोक्षंवामहाजंवाश्रोत्रिया
योपकल्पयेत् सत्क्रियान्वासनंस्वादुभोजनंसूनृतंवचः १०८

व्या सुव्रतायब्रह्मचारिणेयतयेचसत्कृत्यस्वस्तिवाच्यभिक्षा
दानमपूर्वमित्यनेनविधिनाभिक्षादातव्या भिक्षाचग्राससंमिताग्रासश्चमयूरांडपरिमाणः ग्रासमात्राभवेद्भिक्षापुष्कलंतच्चतुर्गुणं हंतस्तेस्तुचतुर्भिः
स्यादग्रंतत्त्रिगुणंभवेदितिशातातपस्मरणात् भोजनकालेचागता सखिसंबंधिबांधवान्भोजयेत् सखायोमित्राणि संबंधिनोयेभ्यः कन्यागृहीतादत्तावा मातृपितृसंबंधिनोबांधवाः १०७ महांतमुक्षाणंधौरेयंमहाजंवाश्रोत्रियायोक्तलक्षणायोपकल्पयेत् भवदर्थमस्माभिः परिकल्पितोयमिति
तत्प्रीत्यर्थंनतुदानायव्यापादनायवा यथासर्वमेतद्भवदीयमिति प्रतिश्रोत्रियमुक्षासंभवात् अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नत्विति निषे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धाच्च तस्मात्सत्क्रियाकर्तव्या सत्क्रियास्वागतवचनासनपाद्यार्घ्याचमनादिदानं तस्मिन्ननुपविष्टेपश्चादुपवेशनमन्वासनं स्वादुभोजनंमिष्टमश
नं सूनृतंवचः धन्यावयमद्यभवदागमनादित्येवमादि अश्रोत्रियेपुनरश्रोत्रियस्योदकासने इतिगौतमोक्तंवेदितव्यं १०८ स्नातकोविद्यास्नात-
कः व्रतस्नातकः विद्याव्रतस्नातकइतिसमाप्यवेदमसमाप्यव्रतंयः समावर्ततेसविद्यास्नातकः समाप्यव्रतसमाप्यवेदंयः समावर्ततेसव्रतस्नात-
कः उभयंसमाप्ययः समावर्ततेसविद्याव्रतस्नातकः आचार्यउक्तलक्षणः पार्थिवोवक्ष्यमाणलक्षणः प्रियोमित्रं विवाह्योजामाता चकारात्श्वशु

प्रतिसंवत्सरंत्वर्घ्याः स्नातकाचार्यपार्थिवाः प्रियोविवाह्यश्चतथायज्ञंप्रत्यृत्विजः पुनः १०९
अध्वनीनोतिथिर्ज्ञेयः श्रोत्रियोवेदपारगः मान्यावेतौगृहस्थस्यब्रह्मलोकमभीप्सतः ११०

रपितृव्यमातुलादीनांग्रहणं ऋत्विजोवृत्वामधुपर्कमाहरेत्स्नातकायोपस्थितायराज्ञेचाचार्यायचश्वशुरपितृव्यमातुलानांचेत्याश्वलायनस्मरणात्
एतेस्नातकादयः प्रतिसंवत्सरंगृहमागताअर्घ्याः मधुपर्केणसंपूज्याः अर्घशब्दोमधुपर्कंलक्षयति ऋत्विजश्चोक्तलक्षणाः संवत्सरादर्वागपिप्रतियज्ञंमधु
पर्केणसंपूज्याः १०९ अध्वनिवर्तमानोतिथिर्वेदितव्यः श्रोत्रियवेदपारगावध्वनिवर्तमानौब्रह्मलोकमभीप्सतोगृहस्थस्यमान्यावतिथीवेदितव्यौ २२
यद्यप्यध्ययनमात्रेणश्रोत्रियस्तथापिश्रुताध्ययनसंपन्नोत्रश्रोत्रियोभिधीयते एकशाखाध्ययनक्षमोवेदपारगः ११० ६७

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

परपाकेरुचिर्यस्यासौतथोक्तोनैवस्यात् अनिंद्येनामंत्रणंविना अनिंद्येनामंत्रितोनापक्रामेदितिस्मरणात् वाक्चपाणीचपादौचवाक्पाणि
पादं तस्यचापल्यंवर्जयेत् वाक्चापल्यंअसभ्यानृतादिभाषणं पाणिचापल्यंपल्याणास्फोटनादि पादचापल्यंलंघनोत्प्लवनादिचकारान्नेत्रा
दिचापल्यंवर्जयेत् नशिश्नोदरपाणिपादचक्षुर्वाक्चापलानिकुर्यादितिगौतमस्मरणात् अतिभोजनंचवर्जयेत् अनारोग्यहेतुत्वात् ११
पूर्वोक्तंश्रोत्रियातिथिंवेदपारगातिथिंचभोजनादिनातृप्तंसीमांतंयावदनुव्रजेत् ततोभोजनानंतरमहःशेषंशिष्टैरितिहासपुराणादिवेदि

परपाकरुचिर्नस्यादनिंद्यामंत्रणादृते वाक्पाणिपादचापल्यंवर्जयेच्चातिभोजनम् ११ अतिथिंश्रोत्रि
यंतृप्तमासीमांतमनुव्रजेत् अहःशेषंसमासीतशिष्टैरिष्टैश्चबंधुभिः ११२ उपास्यपश्चिमांसंध्यांहुत्वा
ग्नीस्तानुपास्यच भृत्यैःपरिवृतोभुक्त्वानातितृप्त्याथसंविशेत् ११३ ब्राह्मेमुहूर्तेचोत्थायचिंतयेदात्म
नोहितम् धर्मार्थकामान्स्वेकालेयथाशक्तिनहापयेत् ११४

भिः इष्टैश्चकाव्यकथाप्रपंचचतुरैः बंधुभिश्चानुकूलालापकु
शलैःसहासीत ११२ ततःपूर्वोक्तेनविधिनापश्चिमांसंध्यामुपास्य अग्निमग्नीन्वाहुत्वातानुपास्योपस्थायभृत्यैःपूर्वोक्तैःस्ववासिन्यादि
भिःपरिवृतोनातितृप्त्याभुक्त्वाचकारादायव्ययादिगृहचिंतांनिर्वर्त्यानंतरंसंविशेत्स्वप्यात् ११३ ततोब्राह्मेमुहूर्तेउत्थायपश्चिमेर्धप्रहरेप्रबु
ध्यात्मनोहितंकृतंकरिष्यमाणंचवेदार्थसंशयांश्चचिंतयेत् तदानींचित्तस्याव्याकुलत्वेनतत्वप्रतिभासयोग्यत्वात् ततोधर्मार्थकामान्स्वोचित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालेयथाशक्तिनपरित्यजेत् यथासंभवंसेवेतेत्यर्थः पुरुषार्थत्वात् यथाहगौतमः नपूर्वाण्हमध्यंदिनापराण्हानफलान्कुर्यात् धर्मार्थकामे भ्यस्तेषुधर्मोत्तरःस्यादिति अत्रयद्यप्येतेषांसामान्येनसेवनमुक्तंतथापिकामार्थयोर्धर्माविरोधेनानुष्ठानं तयोर्धर्ममूलत्वादेवप्रतिदिनमनुष्ठा- नम् ११४ विद्यापूर्वोक्ता कर्मश्रौतस्मार्तंवा वयःआत्मनोतिरिक्तंसमत्यावाऊर्ध्वं बंधुःस्वजनसंपत्तिः वित्तंग्रामरत्नादिकं एतैर्युक्ताः क्रमेणमा न्याःपूजनीयाः एतैर्विद्याकर्मबंधुवित्तैःप्रभूतैःप्रवृद्धैः समस्तैर्व्यस्तैर्वायुक्तः शूद्रोपिवार्धकेअशीतेरूर्ध्वंमानमर्हतीति शूद्रोप्याशीतिकोवरइति गौतमस्मरणात् ११५ वृद्धः प्रसिद्धः भारीभाराक्रांतः नृपोभूपतिर्नक्षत्रियमात्रं स्नातोविद्याव्रतोभयस्नातःस्त्रीप्रसिद्धा रोगीव्याधितः वरोविवा

विद्याकर्मवयोबंधुवित्तैर्मान्यायथाक्रमम् एतैःप्रभूतैःशूद्रोपिवार्धकेमानमर्हति ११५ वृद्धभारिनृप
स्नातस्त्रीरोगिवरचक्रिणाम् पंथादेयोनृपस्तेषांमान्यःस्नातश्चभूपतेः ११६

होद्यतः चक्रीशाकटिकः चकारान्मत्तोन्म- त्तादीनांग्रहणं बालवृद्धमत्तोन्मत्तोपहतदेहभाराक्रांतस्त्रीस्नातकप्रव्रजितेभ्यइतिशंखस्मरणात् एभ्यःपंथादेयः एतेष्वभिमुखायातेषुस्वयं पथोपक्रामेत् वृद्धादीनांराज्ञासहपथिसमवायेराजामान्यइतितस्मैपंथादेयः भूपतेरपिस्नातकोमान्यः स्नातकग्रहणंस्नातकमात्रप्राप्त्यर्थंन ब्राह्मणाभिप्रायेण तस्यसदैवगुरुत्वात् यथाहशंखः अथब्राह्मणायाग्रेपंथादेयोराज्ञइत्येके तच्चानिष्टं गुरुर्ज्येष्ठश्चब्राह्मणोराजानमति शेतेतस्मैपंथाइति वृद्धादीनांपथिपरस्परसमवायेवृद्धतराद्यपेक्षयाविद्यादिभिर्वाविशेषोद्रष्टव्यः ११६ ७ ७ २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैश्यस्यक्षत्रियस्यचचकाराद्ब्राह्मणस्यद्विजानुलोमानांचयागाध्ययनदानानिसाधारणानिकर्माणि ब्राह्मणस्याधिकानिप्रतिग्रहयाजनाध्या
पनानि तथेतिस्मृत्यंतरोक्तवृत्त्युपसंग्रहः यथाह गौतमः कृषिवाणिज्येस्वयंकृतेकुसीदंवेति अध्यापनंतुक्षत्रियवैश्ययोर्ब्राह्मणप्रेरितयोर्भवति
नस्वेच्छया आपत्काले ब्राह्मणस्याब्राह्मणाद्विद्योपयोगोनुगमनंशुश्रूषासमाप्तेब्राह्मणोगुरुरितिगौतमस्मरणात् एतान्यनापदिब्राह्मणस्यष
ट्कर्माणि तत्रत्रीणीज्यादीनिधर्मार्थानि प्रतिग्रहादीनिवृत्त्यर्थानि षण्णांतुकर्मणामस्यत्रीणिकर्माणिजीविका याजनाध्यापनेचैवविशुद्धाच्च

इज्याध्ययनदानानिवैश्यस्यक्षत्रियस्यच प्रतिग्रहोधिकोविप्रेयाजनाध्यापनेतथा ११७ प्रधानंक्षत्रिये
कर्मप्रजानांपरिपालनम् कुसीदकृषिवाणिज्यपाशुपाल्यंविशःस्मृतम् ११८ शूद्रस्यद्विजशुश्रूषातयाजी
वन्वणिग्भवेत् शिल्पैर्वाविविधैर्जीवेद्द्विजातिहितमाचरन् ११९

प्रतिग्रहइतिमनुस्मरणात् अतइज्यादीन्यवश्यंकर्त-
व्यानिनप्रतिग्रहादीनि द्विजातीनामध्ययनमिज्यादानं ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः पूर्वेषुनियमइतिगौतमस्मरणात् ११७
क्षत्रियस्यप्रजापालनंप्रधानंकर्मधर्मार्थंवृत्त्यर्थंच वैश्यस्यकुसीदकृषिवाणिज्यपशुपालनानिवृत्त्यर्थानिकर्माणि कुसीदंवृद्ध्यर्थंद्रव्यप्रयो
गः लाभार्थंक्रयविक्रयोवाणिज्यं शेषंप्रसिद्धं शस्त्रास्त्रभृत्त्वंक्षत्रस्यवणिक्पशुकृषीविशः आजीवनार्थंधर्मस्तुदानमध्ययनंयजिरितिमनु
स्मरणात् ११८ शूद्रस्यद्विजशुश्रूषाप्रधानंकर्मधर्मार्थंवृत्त्यर्थंच तत्रब्राह्मणशुश्रूषापरमोधर्मः विप्रसेवैवशूद्रस्यविशिष्टंकर्मकीर्त्यतइ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिमनुस्मरणात् यदापुनर्द्विजशुश्रूषयाजीवितुंनशक्नोतितदावणिग्वृत्त्याजीवेत् नानाविधैर्वाशिल्पैर्द्विजातीनांहितंकुर्वन् यादृशैः कर्मभिः द्वि-
जातिशुश्रूषायामयोग्योनभवति तादृशानिकर्माणिकुर्वन्नित्यर्थः तानिचदेवलोक्तानि शूद्रधर्मोद्विजातिशुश्रूषापापवर्जनंकलत्रादिपोषणंकर्ष
णपशुपालनभारोद्वहनापणव्यवहारचित्रकर्मनृत्यगीतवेणुवीणामुरजमृदंगवादनादीनि ११९ किंच भार्यायामेवनसाधारणस्त्रीषुपर
स्त्रीषुवारतिरभिगमनंयस्यसतथोक्तः शुचिः बाह्याभ्यंतरशौचयुक्तः द्विजवत् भृत्यादिभर्ता श्राद्धक्रियारतः श्राद्धानिनित्यनैमित्तिक-
काम्यानिच क्रियाः स्नातकव्रतानिअविरुद्धानितेषुरतः नमइत्यनेनमंत्रेणपूर्वोक्तान्पंचमहायज्ञानहरहर्नहापयेत् अनुतिष्ठेत् नमस्कारमंत्रं

भार्यारतिः शुचिर्भृत्यभर्ताश्राद्धक्रियापरः नमस्कारेणमंत्रेणपंचयज्ञान्नहापयेत् १२० अहिंसासत्यम
स्तेयंशौचमिंद्रियनिग्रहः दानंदमोदयाक्षांतिः सर्वेषांधर्मसाधनम् १२१

चकेचित् देवताभ्यः पितृभ्यश्चमहायोगिभ्यए
वच नमः स्वाहायैस्वधायैनित्यमेवनमोनमइतिवर्णयंति नमइत्यन्ये तत्रवैश्वदेवंलौकिकेग्नौकर्तव्यं नवैवाहिकेग्नावित्याचार्याः १२० इदा
नींसाधारणधर्मानाह हिंसाप्राणिपीडातस्याअकरणमहिंसा सत्यमप्राणिपीडाकरंयथार्थवचनम् अस्तेयमदत्तानुपादानम् शौचंबाह्यमा
भ्यंतरंच बुद्धिकर्मेंद्रियाणांनियतविषयवृत्तिताइंद्रियनिग्रहः यथाशक्तिप्राणिनामन्नोदकादिदानेनार्तिपरिहारोदानं अंतःकरणसंयमोदमः २४
आपन्नरक्षणंदया अपकारेपिचित्तस्याविकारः क्षांतिः एतेसर्वेषांपुरुषाणांब्राह्मणाद्याचांडालांतंधर्मसाधनम् १२१ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयोबाल्ययौवनादि बुद्धिर्नैसर्गिकीलौकिकवैदिकव्यवहारेषु अर्थोवित्तंगृहक्षेत्रादि वाक्कथनं वेषोमाल्यवस्त्रादिविन्यासः श्रुतंपुरुषा-
र्थशास्त्रश्रवणं अभिजनः कुलम् कर्मवृत्त्यर्थंप्रतिग्रहादि एतेषांवयः प्रभृतीनांसदृशीमुचितांवृत्तिमाचरणं आचरेत्स्वीकुर्यात् यथावृ-
द्धः स्वोचितांनयौवनोचितां एवंबुद्ध्यादिष्वपियोज्यं अजिह्मामवक्रां अशठाममत्सरां १२२ एवंस्मार्तानिकर्माण्यनुक्रम्येदानींश्रौतानिक
र्माण्यनुक्रामति त्रिवर्षजीवनपर्याप्तंत्रैवार्षिकं अधिकंवाअन्नंयस्यसएवसोमपानंकुर्यात् नातोल्पधनः अतस्त्वल्पीयसिद्रव्येयःसोमं

वयोबुद्ध्यर्थवाग्वेषःश्रुताभिजनकर्मणाम् आचरेत्सदृशींवृत्तिमजिह्मामशठांतथा १२२ त्रैवार्षिकाधिकान्नोयः
सहिसोमंपिबेद्द्विजः प्राक्सौमिकीःक्रियाः कुर्याद्यस्यान्नंवार्षिकंभवेत् १२३ प्रतिसंवत्सरंसोमः पशुःप्रत्ययनंतथा
कर्तव्याग्रयणेष्टिश्चचातुर्मास्यानिचैवहि १२४

तिद्विजः सपीतसोमपूर्वोपिनतस्याप्नोतितत्फलमितिदोषश्रवणात् एतच्चकाम्या
भिप्रायेणनित्यस्यचावश्यकर्तव्यत्वान्ननियमः यस्यवर्षजीवनपर्याप्तमन्नंभवतिसप्राक्सौमिकीः सोमात्प्राक् प्राक्सोमंप्राक्सोमंभवाःप्राक्सौ-
मिक्यः कान्ताः अग्निहोत्रदर्शपूर्णमासपशुचातुर्मास्यानिकर्माणितद्विकाराश्चैताः क्रियाःकुर्यात् १२३ एवंकाम्यानिश्रौतानिकर्माण्यभिधा
येदानींनित्यान्याह संवत्सरेसंवत्सरेसोमयागःकार्यः पशुःप्रत्ययनंअयनेअयनेदक्षिणोत्तरसंज्ञितेनिरूढःपशुयागःकार्यः तथाप्रतिसंवत्सरंवा प
शुनासंवत्सरेसंवत्सरेयजेतषट्सुषट्सुवामासेष्वित्येकेइतिस्मरणात् आग्रयणेष्टिश्चसस्योत्पन्नौकर्तव्या चातुर्मास्यानिचप्रतिसंवत्सरंकर्तव्यानि १२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एषांसोमप्रभृतीनांपूर्वोक्तानांनित्यानांकथंचिदसंभवेतत्कालेवैश्वानरीमिष्टिंकुर्यात् किंच योयंहीनकल्पउक्तः सतिद्रव्येसोनकर्तव्यः यच्च फलप्रदंकाम्यंतद्धीनकल्पंनकुर्वीत नकर्तव्यमिति १२५ यज्ञार्थंशूद्रधनयाचनेनसजन्मांतरेचांडालोजायते यःपुनर्यज्ञार्थंयाचितंसर्वंन प्रयच्छतिनत्यजतिसभासः काकोवावर्षशतंभवेत् यथाहमनुः यज्ञार्थमर्थंभिक्षित्वायःसर्वंनप्रयच्छति सयातिभासतांविप्रःकाकतांवाशतं समाइति भासः शकुंतः काकःप्रसिद्धः १२६ कुशूलंकोष्ठकं कुंभीउष्ट्रिका कुशूलंचकुंभीचकुशूलकुंभ्यौ ताभ्यांपरिमितंधान्यंयस्यसतथोक्तः कुशूलधान्यःस्यात्कुंभीधान्योवा तत्रस्वकुटुंबपोषणेद्वादशाहमात्रपर्याप्तंधान्यंयस्यास्तिसकुशूलधान्यः कुंभीधान्यस्तुस्वकुटुंबपोषणेषडहमात्र

एषामसंभवेकुर्यादिष्टिंवैश्वानरींद्विजः हीनकल्पंनकुर्वीतसतिद्रव्येफलप्रदम् १२५ चांडालोजायतेयज्ञकर
णाच्छूद्रभिक्षितात् यज्ञार्थंलब्धमददद्भासःकाकोपिवाभवेत् १२६ कुशूलकुंभीधान्योवात्र्याहिकोश्वस्तनोपि
वा जीवेद्वापिशिलोंछेनश्रेयानेषांपरःपरः १२७

पर्याप्तधान्यः त्र्यहःपर्याप्तंधान्यमस्यास्तीतित्र्याहिकः श्वोभवंधान्यमस्यास्ती तिश्वस्तनः नविद्यतेश्वस्तनंयस्यसोश्वस्तनः कुशूलधान्यादिसंचयोपायमाह शाल्यादेर्निपतितपरित्यक्तवल्लरीग्रहणंशीलं एकैकस्यपरित्यक्त स्यकणस्योपादानमुंछः शिलंचोंछश्चशिलोंछंतेनशिलोंछेनवा कुशूलधान्यादिश्चतुर्विधोगृहस्थोजीवेत् एषांकुशूलधान्यादीनांब्राह्मणानांच तुर्णांपरःपरः पश्चात्पश्चात्पठितःश्रेयानुत्कृष्टतमः प्रशस्यतमः एतच्चयद्यपिद्विजःप्रकृतस्तथापिब्राह्मणस्यैवभवितुमर्हतीति विद्योपशमना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वियोगात् तथाच्चमनुः अद्रोहेणैवभूतानामल्पद्रोहेणवापुनः यावृत्तिस्तांसमास्थायविप्रोजीवेदनापदीतिविप्रमेवप्रस्तुत्य कुशूलधान्यको
वास्यात्कुंभीधान्यकएववा इत्याद्यभिहितत्वात् एतच्चातिसंपन्नंसंयतंयायावरंप्रत्युच्यते नविप्रमात्राभिप्रायेण तथासतित्रैवार्षिकाधिकान्नो
यः सहिसोमंपिबेद्द्विजइत्येनेनविरोधः तथाचगृहस्थानांद्वैविध्यंतत्रतत्रोक्तं यथाहदेवलः द्विविधोगृहस्थोयायावरः शालीनश्चतयोर्यायावरः
प्रवरः याजनाध्यापनाप्रतिग्रहरिक्थसंचयवर्जनात् षट्कर्माधिष्ठितः प्रेष्यचतुष्पद्गृहग्रामधनधान्ययुक्तोलोकानुवर्त्तीशालीनइति शालीनो
पिच्चतुर्विधः याजनाध्यापनप्रतिग्रहकृषिवाणिज्यपाशुपाल्यैः षड्भिर्जीवत्येकः याजनादिभिस्त्रिभिरन्यः याजनाध्यापनाभ्यामपरः चतुर्थस्त्व

नस्वाध्यायविरोध्यर्थमीहेतनयतस्ततः नविरुद्धप्रसंगेनसंतोषीचभवेत्सदा १२८

ध्यापनेनैव तथाहमनुः षट्कर्मैकोभवत्येषांत्रिभिरन्यःप्रवर्तते द्वाभ्यामेकश्चतुर्थश्चब्रह्मसत्रेणजीवतीति अत्रचप्रतिग्रहोधिकोविप्रइत्या
दिनाशालीनस्यवृत्तयोदर्शिताः यायावरस्यजीवेद्वापिशिलोंछेनेति इतिगृहस्थधर्मप्रकरणम् १२७ एवंश्रौतस्मार्तानिकर्माणिगृहस्थस्या
भिधायेदानींस्नानादारभ्यब्राह्मणस्यावश्यकर्तव्यानिविधिप्रतिषेधात्मकानिमानससंकल्परूपाणिस्नातकव्रतान्याह ब्राह्मणस्यप्रतिग्रहाद-
योर्थप्राप्त्युपायादर्शिताः तत्रविशेषउच्यते स्वाध्यायविरोधिनमर्थंअप्रतिषिद्धमपिनेहेतनान्विच्छेत नयतस्ततः कुतश्चिदविदिताचारान्नविरु-
द्धप्रसंगेनविरुद्धमयाज्ययाजनादिप्रसंगोनृत्यगीतादिर्विरुद्धंचप्रसंगश्चविरुद्धप्रसंगतेननार्थमीहेतेतिसंबंध्यते नञआवृत्तिः प्रत्येकंपर्युदा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सार्था सर्वत्राप्यस्मिन् स्नातकप्रकरणेनञ्शब्दः पर्युदासार्थ एव किंच अर्थालाभेपिसंतोषीपरितृप्तोभवेत् चकारात्संयतश्च संतोषंपरमास्था
यसुखार्थीसंयतोभवेदितिमनुस्मरणात् १२८ कुतस्तर्हिधनमन्विच्छेदित्याह क्षुधासीदन्पीड्यमानः स्नातकः राज्ञोविदितवृत्तांतात् अंतेवा
सिनोवक्ष्यमाणलक्षणात् याज्यात्याजनार्हाच्च धनमाददीत क्षुधासीदन्नित्यनेनविभागादिप्राप्तकुटुंबपोषणपर्याप्तधनोनकुतश्चिदर्थमन्वि
च्छेदितिगम्यते किंच दंभिहेतुकादीन्सर्वकार्येषुलौकिकवैदिकशास्त्रीयेषुवर्जयेत् चकाराद्विकर्मस्थवैडालव्रतिकान् शठान् यथाहमनुः पा
खंडिनोविकर्मस्थान्वैडालव्रतिकान्शठान् हेतुकान्बकवृत्तींश्च वाङ्मात्रेणापिनार्चयेदिति लोकरंजनार्थमेवकर्मानुष्ठायीदंभी युक्तिबलेन

राजांतेवासियाज्येभ्यः सीदन्निच्छेद्धनंक्षुधा दंभिहेतुकपाखंडिबकवृत्तींश्चवर्जयेत् १२९

सर्वत्रसंशयकारीहैतुकः त्रैविध्यविरुद्धपरिगृहीताश्रमिणः पाखंडिनः बकवदस्यवर्तनमितिबकवृत्तिः यथाहमनुः अधोदृष्टि-
र्नैष्कृतिकः स्वार्थसाधनतत्परः शठोमिथ्याविनीतश्च बकव्रत्तिरुदाहृतइति प्रतिषिद्धसेविनोविकर्मस्थाः विडालोमार्जारस्तस्यव्रतंस्वभा
वोयस्यासौविडालव्रतिकः तस्यलक्षणमाहमनुः धर्मध्वजीसदालुब्धश्छाद्मिकोलोकदांभिकः वैडालव्रतिकोज्ञेयोहिंस्रः सर्वाभिसं
धकइति शठः सर्वत्रवक्रः एतैः संसर्गनिषेधादेवस्वयमेवंविधोनभवेदितिगम्यते १२९ ॐ ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच शुक्ले धौतेअंबरेवाससीधरतिइतिशुक्लांबरधरः केशाश्चश्मश्रूणिचनखाश्चकेशश्मश्रुनखंनीचंनिकृंतंकेशश्मश्रुनखंयस्यासौतथोक्तः शुचिरंतर्बहिश्चस्नानानुलेपनधूपस्रगादिभिः सुगंधीचभवेत् यथाहगौतमः स्नातकोनित्यंशुचिः सुगंधिः स्नानशीलइति सुगंधित्वविधानादेवनिर्गंधमाल्यस्यनिषेधः तथाचगोभिलः नागंधांस्रजंधारयेदन्यत्रहिरण्यरत्नस्रजइति सदास्नातकएवंभूतोभवेत् एतच्चसतिसंभवेनजीर्णमलवद्वासाभवेच्चविभवेसतीतिस्मरणात् नचभार्यायादर्शनेतस्यांपुरतोवस्थितायामश्नीयात् अवीर्यवदपत्योत्पत्ति

शुक्लांबरधरोनीचकेशश्मश्रुनखः शुचिः नभार्यादर्शनेश्नीयान्नैकवासानसंस्थितः १३०
नसंशयंप्रपद्येतनाकस्मादप्रियंवदेत् नाहितंनानृतंचैवनस्तेनः स्यान्नवार्धुषी १३१

भयात् तथाचश्रुतिः जायायाअंतेनाश्नीयादवीर्यवदपत्यंभवतीति अतस्तयासहभोजनंदूरादेवनिरस्तं नचैकवासाः नसंस्थितः उत्थितः अश्नीयादितिसंबध्यते १३० किंच कदाचिदपिसंशयंप्राणिविपत्तिसंशयावहंकर्मनप्रपद्येतनकुर्यात् यथाव्याघ्रचौराद्युपाहितदेशाक्रमणादि अकस्मान्निष्कारणंकिंचिदपिपरुषमप्रियंउद्वेगकरंवाक्यंनवदेत् नचाहितमनृतंवाप्रियमपिन्चकारादसभ्यंबीभत्सकरंचाकस्मान्नवदेदितिसंबध्यते एतच्चपरिहासादिव्यतिरेकेण गुरुणापिसमंहास्यंकर्तव्यंकुटिलंविनेतिस्मरणात् नचस्तेनः अन्यदीयस्यादत्तस्यग्रहीतानस्यात् प्रतिषिद्धवृद्ध्युपजीवीवार्धुषीनवार्धुषीस्यात् १३१ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच दाक्षायणंसुवर्णंतदस्यास्तीतिदाक्षायणी ब्रह्मसूत्रंयज्ञोपवीतंतदस्यास्तीतिब्रह्मसूत्री वैणवयष्टिमान् कमंडलुमान्स्यादितिसर्वत्र संबंधनीयं अत्रब्रह्मचारिप्रकरणोक्तस्यापियज्ञोपवीतस्यपुनर्वचनंद्वितीयप्राप्त्यर्थं यथाहवसिष्ठः स्नातकानांद्वितीयंस्यादंतर्वासस्त थोत्तरं यज्ञोपवीतेद्वेयष्टिःसोदकश्चकमंडलुरिति अत्रचदाक्षायणीतिसामान्याभिधानेपिकुंडलधारणमेवकार्यं वैणवींधारयेद्यष्टिंसोद कंचकमंडलुं यज्ञोपवीतंवेदंचशुभेरौक्मेचकुंडलइतिमनुस्मरणात् तथादेवंदेवतार्चां मृदमुद्धृतांगांब्राह्मणंवनस्पतींश्च अश्वत्थादीन्प्रद

दाक्षायणीब्रह्मसूत्रीवेणुमान्सकमंडलुः कुर्यात्प्रदक्षिणंदेवमृद्गोविप्रवनस्पतीन् १३२
नतुमेहेन्नदीछायावर्त्मगोष्ठांबुभस्मसु नप्रत्यग्न्यर्कगोसोमसंध्यांबुस्त्रीद्विजन्मनः १३३

क्षिणंकुर्यात् एतान्प्रदक्षिणतःकृत्वाव्रजेत् एवंचतुःपथादीनपि मृदंगांदेवतांविप्रंघृतंमधुचतुःपथं प्रदक्षिणानिकुर्वीतप्रज्ञातांश्चवन स्पतीनितिमनुस्मरणात् १३२ नद्यादिषुनमेहेत् नमूत्रपुरीषोत्सर्गंकुर्यात् एवंश्मशानादावपि यथाहशंखः नगोमयकृष्टोप्तशाड्व लचितिश्मशानवर्त्मखलपर्वतपुलिनेषुमेहेत् भूताधारत्वादिति तथाग्न्यादीन्प्रति अग्न्यादीनामभिमुखंनमेहेत् नाप्येतान्पश्यन् यथाह गौतमः नवाय्वग्निविप्रादित्यापोदेवतागाश्चप्रतिपश्यन्वामूत्रपुरीषामेध्यान्व्युदस्येन्नैतादेवताःप्रतिपादौप्रसारयेत् एतद्देशव्यतिरेकेणभूमि मयज्ञियैस्तृणैरंतर्धायमूत्रपुरीषेकुर्यादिति यथाहवसिष्ठः परवेष्टितशिराभूमिमयज्ञियैस्तृणैरंतर्धायमूत्रपुरीषेकुर्यादिति १३३ ७ १२७
पं॰२-नै कुर्यात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैवार्कमीक्षेत यद्यपिसामान्येनोक्तं तथापिउदयास्तमयराहुग्रस्तोदकप्रतिबिंबमध्यान्हवर्तिनएवादित्यस्यावेक्षणंनिषिध्यतेनसर्वदा यथो
क्तंमनुना नेक्षेतोद्यंतमादित्यंनास्तंयांतंकदाचन नोपसृष्टंनवारिस्थंनमध्यंनभसोगतमिति उपभोगादन्यत्रनग्नांस्त्रियंनेक्षेत अन्यत्रमैथुना
दित्याश्वलायनः संसृष्टमैथुनांकृतोपभोगांउपभोगांते अनग्नामपिनेक्षेतचकाराद्भोजनादिकमाचरंतीं तथाचमनुः नाश्नीयाद्भार्ययासार्द्धंनैना
मीक्षेतचाश्नतीं क्षुवतींजृंभमाणांचनचासीनांयथासुखं नांजयंतींस्वकेनेत्रेनचाभ्यक्तामनावृतां नपश्येत्प्रसवंतींचश्रेयस्कामोद्विजोत्तमइ
ति मूत्रपुरीषेचनपश्येत् तथाअशुचिःसन्राहुतारकाश्चनपश्येत् चकारादुदकेस्वप्रतिबिंबंनपश्येत् नचोदकेनिरीक्षेतस्वरूपमितिधारणे

नेक्षेतार्कंननग्नांस्त्रींनचसंसृष्टमैथुनाम् नचमूत्रंपुरीषंवानाशुचीराहुतारकाः १३४ अयंमेवज्रइत्येवंसर्वंमं
त्रमुदीरयेत् वर्षत्यप्रावृतोगच्छेत्स्वपेत्प्रत्यकशिरानच १३५ ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सुननिक्षिपेत् पादौप्रता
पयेन्नाग्नौनचैनमभिलंघयेत् १३६

तिवचनात् १३४ वर्षतिसति अयंमेवज्रः पाप्मानमपहंत्वितिमंत्रमुच्चारयेत् अप्रावृतो
गच्छेत् अनाच्छादितइयात् नप्रधावेच्चवर्षतीतिप्रतिषेधात् नचप्रत्यक्शिराः सुप्यात् चकारान्नग्नोनशयीत एकश्चशून्यगृहेनचनग्नःश
यीतेति नैकःसुप्याच्छून्यगृहेइतिचमनुस्मरणात् १३५ ष्ठीवनमुद्गिरणंअसृग्रक्तं शकृत्पुरीषं शेषंप्रसिद्धं एतान्यप्सुननिक्षिपेत् एवंतुषा
दीनपि यथाहशंखः तुषकेशपुरीषभस्मास्थिश्लेष्मनखलोमान्यप्सुननिक्षिपेत् पादेनपाणिनावाजलंनाभिहन्यादिति अग्नौचपादौनप्रता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पयेत् नाप्यग्निं लंघयेत् चकारान्निष्ठीवनादीन्यग्नौ न क्षिपेत् मुखोपधमनादि चाग्नेर्न कुर्यात् तथा च मनुः नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत
च स्त्रियं नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत् अधस्तान्नोपदध्याच्च न चैनमभिलंघयेत् न चैनं पादतः कुर्यान्न प्राणावधिमाचरेदिति १३६
जलमंजलिना संहताभ्यां हस्ताभ्यां न पिबेत् जलग्रहणं पेयमात्रोपलक्षणं विद्यादिभिरात्मनोधिकं शयानं न प्रबोधयेत् नोत्थापयेत् श्रेयांसं न
प्रबोधयेदिति विशेषात् अक्षादिभिर्न क्रीडेत् धर्मघ्नैः पशुलंभनादिभिर्न क्रीडेत व्याधितैर्ज्वराद्यभिभूतैरेकत्र न संविशेत् न शयीत १३७

जलं पिबेन्नांजलिना न शयानं प्रबोधयेत् नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैर्वा न संविशेत् १३७ विरुद्धं वर्जये
त्कर्म प्रेतधूमं नदीतरम् केशभस्मतुषांगारकपालेषु च संस्थितिम् १३८ नाचक्षीत धयंतीं गां नाद्वारेण वि
शेत्क्वचित् न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः १३९ प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः दुष्टा
दशगुणं पूर्वात्पूर्वादेते यथाक्रमम् १४०

जनपदकुलाचारग्रामविरुद्धं कर्म वर्जयेत् प्रेतधूमं च बाहुभ्यां नदीतरणं वर्जयेदिति
संबध्यते केशादिषु संस्थितिं वर्जयेत् चकारादस्थिकार्पासमेध्येषु १३८ परस्य क्षीरादि पिबंतीं गां परस्मै नाचक्षीत न च निवर्तयेत् अ
द्वारेण कुपथेन क्वचिदपि नगरे ग्रामे मंदिरे वा न प्रविशेत् न च कृपणस्य शास्त्रातिक्रमकारिणो राज्ञः सकाशात्प्रतिगृह्णीयात् १३९ प्रतिग्र
हेषु साध्येषु च सून्यादयः पंच पूर्वस्मात्पूर्वस्मात्परः परो दशगुणदुष्टः सूना प्राणिहिंसा सास्यास्तीति सूनी प्राणिहिंसापरः चक्री तैलिकः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्वजीसुराविक्रयी वेश्यापण्यस्त्री नराधिपः अनंतरोक्तः १४० अथाध्ययनधर्मानाह अधीयंतइत्यध्याया वेदास्तेषामुपाकर्म उपक्रम
मोषधीनां प्रादुर्भावे सति श्रावणमासस्य पौर्णमास्यां श्रवणनक्षत्रयुते वादिने हस्तेन युतायां पंचम्यां वा स्वगृह्योक्तविधिना कुर्यात् यदातु श्रा
वणमासे औषधयो न प्रादुर्भवंति तदा भाद्रपदे मासे श्रवणनक्षत्रे कुर्यात् ततऊर्ध्वं सार्धचतुरो मासान् वेदानधीयीत तथाच मनुः श्रावण्यां
प्रोष्ठपद्यां वाप्युपाकृत्य यथाविधि युक्तश्छंदांस्यधीयीत मासान्विप्रोर्धपंचमानिति १४१ पौषमासस्य रोहिण्यामष्टकायां वा ग्रामात् बहिर्ज

अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा हस्तेनौषधिभावे वा पंचम्यां श्रावणस्य तु १४१
पौषमासस्य रोहिण्यामष्टकायामथापि वा जलांते छंदसां कुर्यादुत्सर्गं विधिवद्बहिः १४२

लः समीपे छंदसां वेदानां स्वगृह्योक्तविधिनोत्सर्गं कुर्यात् यदापुनर्भाद्रपदे मासे उपाकर्म तदा माघशुक्लप्रथमदिवसे उत्सर्गं कुर्यात् -
यथोक्तं मनुना पौषे तु छंदसां कुर्याद्बहिरुत्सर्जनं बुधः माघशुक्लस्य वा प्राप्ते पूर्वाण्हे प्रथमेऽहनीति तदनंतरं पक्षिणीमहोरात्रं वा विरम्य शु
क्लपक्षेषु वेदान् कृष्णपक्षे षडंगान्यधीयीत यथाह मनुः यथाशास्त्रं तु कृत्वैवमुत्सर्गं छंदसां बहिः विरमेत्पक्षिणीं रात्रिं यद्वाप्येकमहर्निश
म् अतऊर्ध्वं तु छंदांसि शुक्लेषु नियतः पठेत् वेदांगानि च सर्वाणि कृष्णपक्षेषु संपठेदिति १४२ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनध्यायानाह उक्तेन मार्गेणाधीयानस्य शिष्यर्त्विग्गुरुबंधुषु प्रेतेषु मृतेषु त्र्यहमनध्यायः त्रीनहोरात्रानध्ययनं वर्जयेत् उपाकर्मणि उत्सर्गाख्ये
कर्मणि कृते त्र्यहमनध्यायः उत्सर्गे तु मनूक्त पक्षिण्यहोरात्राभ्यां सहास्य विकल्पः स्वशाखाश्रोत्रिये स्वशाखाध्यायिनि प्रेते च त्र्यहमनध्यायः १४३
संध्यायां मेघध्वनौ निर्घाते आकाशे उत्पातध्वनौ भूमिचलने उल्कापतने मंत्रस्य ब्राह्मणस्य वा समाप्तौ आरण्यकाध्ययने च द्युनिशमहोरात्रमनध्या
यः १४४ पंचदश्याममावास्यायां पूर्णिमायां चतुर्दश्यामष्टम्यां राहुसूतके चंद्रसूर्योपरागे च द्युनिशमनध्यायः यत्तु त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहो
श्च सूतके इति तद्ग्रस्तास्तविषयं ऋतुसंधिगतासु च प्रतिपत्सु श्राद्धिकभोजने तत्प्रतिग्रहे च द्युनिशमनध्यायः एतच्चैकोद्दिष्टव्यतिरिक्तविषयं तत्र तु

त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा १४३ संध्यागर्जितनिर्घातभूकंपोल्का
निपातने समाप्य वेदं द्युनिशमारण्यकमधीत्य च १४४ पंचदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ऋतुसंधिषु भुक्त्वा वा श्राद्धिकं प्रति
गृह्य च १४५ पशुमंडूकनकुलश्वाहिमार्जारमूषकैः कृतेंतरे त्वहोरात्रं शक्रपाते तथोच्छ्रये १४६ त्रिरात्रं प्रतिगृह्य द्विजो विद्यानेकोद्दिष्टस्य

केतनं त्र्यहं न कीर्तयेद्ब्रह्मेति स्मरणात् १४५ अध्येतॄणां पश्वादिभिरंतरागमने कृते शक्रध्वजस्यावरोपणदिवसे उच्छ्रयदिवसे चाहोरात्रमनध्यायः द्युनिश
मिति प्रकृते पुनरहोरात्रग्रहणं संध्यागर्जितनिर्घातभूकंपोल्कानिपातेष्वाकालिकत्वज्ञापनार्थं आकालिकनिर्घातभूकंपोल्कानिपातेष्वाकालिकत्वज्ञाप
नार्थं आकालिकनिर्घातभूकंपराहुदर्शनोल्का इति गौतमवचनात् निमित्तकालादारभ्यापरेद्युर्यावत्स एव कालस्तावत्काल अकालः तत्र भव आका-
लिकोनध्यायः एतच्च प्रातःसंध्यास्तनिते रात्रिसंध्यास्तनिते तु रात्रिमेव सायंसंध्यास्तनिते रात्रिः प्रातःसंध्यामहोरात्रमिति हारीतस्मरणात् य २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तुनगौंतमेनोक्तं श्वानकुलसर्पमंडूकमार्जाराणांत्र्यहमुपवासोविप्रवासश्चेति तत्प्रथमाध्ययनविषयएव १४६ श्वाकुक्कुरः क्रोष्टासृगालः गर्द
भोरासभः सामसामानि वाणोवंशः उलूकोघूकः आर्तोदुःखितः एषांश्वादीनांनिःस्वनेतावत्कालमनध्यायः वीणादिस्वनेपि वेणुवीणाभेरीमृदं
गगंत्र्यार्तशब्देष्विति गौतमवचनात् गंत्रीशकटं अमेध्यादीनांसंनिधानेतावत्कालिकोनध्यायः १४७ अशुचौदेशेअशुचावात्मनिच तथाविद्यु
त्संप्लवेपुनः पुनर्विद्योतमानायांविद्युतिस्तनितसंप्लवेपुनः पुनर्मेघघोषेतावत्कालिकोनध्यायः भुक्त्वार्द्रपाणिर्नाधीयीत जलमध्येर्द्धरात्रेमहानिशा

श्वक्रोष्टुगर्दभोलूकसामवाणार्तनिःस्वने अमेध्यशवशूद्रांत्यश्मशानपतितांतिके १४७ देशेशुचावात्मनिचविद्यु
त्स्तनितसंप्लवे भुक्त्वार्द्रपाणिरंभोंतरर्धरात्रेतिमारुते १४८ पांसुप्रवर्षेदिग्दाहेसंध्यानीहारभीतिषु धावतःपूतिगंधेच
शिष्टेचगृहमागते १४९ खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः १५०

रव्येमध्यमप्रहरद्वये अतिमारुतेअहन्यपितावत्कालंनाधीयीत १४८ औत्पातिकेरजोवर्षे दिग्दाहेयत्रज्वलिताइवदिशोदृश्यंते संध्ययोर्नीहारेधू
मिकायां भीतिषुचोरराजादिकृतासुतावत्कालमनध्यायः धावतस्त्वरितंगच्छतोनध्यायः पूतिगंधेकुत्सितगंधेच अमेध्यमद्यादिगंधे शिष्टेचश्रोत्रि
यादौगृहंप्राप्तेतदनुज्ञावधिरनध्यायः १४९ यानंरथादि इरणमूषरं मरुभूमिर्वा खरादीनामारोहणेतावत्कालमनध्यायः एवंश्वक्रोष्टृगर्दभेत्यस्मा
दारभ्यसप्तत्रिंशदनध्यायांस्तात्कालिकान्निमित्तसमकालान्विदुरनध्यायविधिज्ञाः विदुरित्यनेनस्मृत्यंतरोक्तानन्यानपिसंगृह्णाति यथाहमनुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकं नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव चेत्यादि १५० एवमनध्यायानुक्त्वा प्रकृतानि स्नातकव्रतान्याह
देवानामृत्विक्स्नातकाचार्यराज्ञां परस्त्रियाश्च छायां नाक्रामेन्नाधितिष्ठेन्नलंघयेत् बुद्धिपूर्वं यथाह मनुः देवतानां गुरो राज्ञः स्नातकाचार्ययो
रपि नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य चेति बभ्रुणो नकुलवर्णस्य यस्य कस्यचित् गोरश्वस्य वा सोमादेर्वा बभ्रुण इति नपुंसकलिंगनिर्देशात्
रक्तादीनि च नाधितिष्ठेत् आदिग्रहणात्स्नानोदकादेर्ग्रहणं उद्वर्तनमलस्नानं विण्मूत्रं रक्तमेव च श्लेष्मनिष्ठ्यूतवांतानि नाधितिष्ठेत कामत इति

देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियाः नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनादि च १५१ विप्राहिक्षत्रि
यात्मानो नावज्ञेयाः कदाचन आमृत्योः श्रियमाकांक्षेन्न कंचिन्मर्मणि स्पृशेत् १५२ दूरादुच्छिष्टविण्मूत्रपादां-
भांसि समुत्सृजेत् श्रुतिस्मृत्युदितं सम्यङ्नित्यमाचारमाचरेत् १५३

१५१ विप्रो बहुश्रुतो ब्राह्मणः अहिः सर्पः क्षत्रियो नृप-
तिः एते कदाचिदपि नावमंतव्याः आत्मा च स्वयं नावमंतव्यः आमृत्योर्यावज्जीवं श्रियमिच्छेत् न कंचिन्मर्मणि स्पृशेत् कस्यचिदपि मर्म दुश्चरितं
न प्रकाशयेत् १५२ भोजनादुच्छिष्टं विण्मूत्रे पादप्रक्षालनोदकं च गृहात् दूरात् समुत्सृजेत् श्रौतं स्मार्तं चाचारं नित्यं सम्यगनुतिष्ठेत् १५३
गां ब्राह्मणमग्निं अन्नमदनीयं विशेषतः पक्वमशुचिर्न स्पृशेत् पादेन त्वनुच्छिष्टोपि यदा पुनः प्रमादात्स्पृशति तदा आचमनोत्तरकालं स्पृष्ट्वैता ३०
नशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत् गात्राणि चैव सर्वाणि नाभिं पाणितलेन त्विति मनूक्तं कार्यं एवं प्राणादीनुपस्पृशेत् कस्यचिदपि निंदाताडने-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकुर्यात् एतच्चानपकारिणि अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगंततः दुःखंसुमहदाप्नोति प्रेत्याप्राज्ञतयानरइति पुत्रशिष्योशिक्षार्थमेव
ताडयेत् चकाराद्दासादीनपि ताडनंचरज्ज्वादिनोत्तमांगव्यतिरेकेणकार्यं शिष्यशिष्टिरवधेनबाधनाशक्तौरज्जुवेणुविदलाभ्यांतनुभ्यामन्ये
नघ्नन्राज्ञाशास्यतइतिगौतमवचनात् पृष्ठतस्तुशरीरस्यनोत्तमांगेकथंचनेतिवचनात् १५४ कर्मणाकायेनयथाशक्तिधर्ममनुतिष्ठेत्त
मेवमनसाध्यायेत् वाचावदेत् धर्मंविहितमपिलोकविद्विष्टंलोकाभिशस्तिजननंमधुपर्केगोवधादिकंनाचरेत् यस्मादस्वर्ग्यमग्निष्टोमीयव

गोब्राह्मणनलान्नानिनोच्छिष्टोनपदास्पृशेत् ननिंदाताडनेकुर्यात्पुत्रंशिष्यंचताडयेत् १५४ कर्मणामनसावाचा
यत्नाद्धर्मंसमाचरेत् अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नतु १५५ मातृपित्रतिथिभ्रातृजामिसंबंधिमातुलैः वृद्ध
बालातुराचार्यवैद्यसंश्रितबांधवैः १५६ ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः विवादंवर्जयित्वातुसर्वांल्लोका
नजयेद्गृही १५७

स्वर्गसाधनंनभवति १५५ माताजननीपिताजनकः अतिथिरध्वनीनः भ्रातरोभिन्नोदराअपि जामयोविद्य
मानभर्तृकाः स्त्रियः संबंधिनोवैवाह्याः मातुलोमातुर्भ्राता वृद्धः सप्तत्युत्तरवयस्कः बालआषोडशाद्वर्षात् आतुरोरोगी आचार्यउपनेता
वैद्योविद्वान्भिषग्वा संश्रितः उपजीवी बांधवाः पितृपक्ष्यामातृपक्ष्याश्च मातुलस्यपृथगुपादानमादरार्थं ऋत्विग्याजकः पुरोहितःशान्त्यादेःक
र्ता अपत्यंपुत्रादि भार्यासहधर्मचारिणी दासः कर्मकरः सनाभयः सोदराः भ्रातृभ्यः पृथगुपादानमजामिभगिनीप्राप्त्यर्थं एतैर्मात्रादिभिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सहवाकलहं परित्यज्यवासर्वान्प्राजापत्यादीन् लोकान्प्राप्नोति १५६ १५७ परवारिषु परसंबंधिषु सर्वसत्योद्देशेनात्यक्तेषु तडागादिषु पंच
पिंडाननुधृत्य नस्नायात् अनेनात्मीयोत्सृष्टाभ्यनुज्ञातेषु पिंडोद्धारमंतरापिस्नानमभ्यनुज्ञातं नद्यादिषु कथंनहीत्याह स्नायान्नदीति साक्षा
त्परंपरयावासमुद्रगाः स्रवंत्योनद्यः देवखातंदेवनिर्मितं पुष्करादिउदकप्रवाहाभिघातकृतसजलोमहानिम्नप्रदेशोह्रदः पर्वताद्युच्चप्रदेशात्प्र
स्रुतमुदकंप्रस्रवणं एतेषु पंचपिंडाननुद्धरणेनैवस्नायात् एतच्चनित्यस्नानविषयंसतिसंभवेनदीषुदेवखातेषु तडागेषु सरःसुचस्नानंसमाच

पंचपिंडाननुद्धृत्यनस्नायात्परवारिषु स्नायान्नदीदेवखातह्रदप्रस्रवणेषुच १५८ परशय्यासनोद्यानगृहयाना
निवर्जयेत् अदत्तान्यग्निहीनस्यनान्नमद्यादनापदि १५९

रेन्नित्यंगर्तप्रस्रवणादिष्विति नित्यग्रहणात् शौचाद्यर्थे
चयथासंभवंपरवारिषु पंचपिंडानुद्धरणेपिसर्वस्यननिषेधः १५८ शय्याकशिपुः आसनंपीठादि उद्यानमाम्रप्रवणादि गृहंप्रसिद्धं-
यानंरथादि परसंबंधीन्येतान्यदत्तान्यननुज्ञातानिवर्जयेत् नोपभुंजीत अभोज्यान्नान्याह अग्निहीनस्येति अग्निहीनस्यश्रौतस्मार्ता
ग्न्यधिकाररहितस्यशूद्रस्य प्रतिलोमस्यवाधिकारवतोप्यग्निरहितस्यान्नमनापदिनभुंजीत नप्रतिगृण्हीयाच्च तस्मात्प्रशस्तानांस्व- ३१
कर्मणाशुद्धजातीनां ब्राह्मणोभुंजीत प्रतिगृण्हीयाच्चेति गौतमवचनात् १५९ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कदर्यो लुब्धः आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत् लोभाद्यः पितरौ भृत्यान्स कदर्य इति स्मृत इत्युक्तः बन्धो निगडादिना वाचा संनिरुद्धश्च चोरः ब्राह्मणसुवर्णव्यतिरिक्तपरस्वापहारी क्लीबो नपुंसकः रंगावतारी नटचारणमल्लादिः वेणुच्छेदजीवी वैणः अभिशस्तः पतनीयैः कर्मभिर्युक्तः वार्धुष्यो निषिद्धवृद्ध्युपजीवी गणिका पण्यस्त्री गणदीक्षी बहुयाजकः एतेषामन्नं नाश्नीयादित्यनुवर्तते १६० चिकित्सको भिषग्वृत्त्युपजीवी आतुरो महारोगोपसृष्टः वातव्याध्यश्मरीकुष्टमेहोदरभगंदराः अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्तिता इति क्रुद्धः कुपितः पुंश्चली व्य

कदर्यबन्द्धचोराणां क्लीबरंगावतारिणाम् वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणाम् १६० चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम् क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनाम् १६१ अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम् शस्त्रविक्रयकर्मारतंतुवायश्ववृत्तिनाम् १६२

भिचारिणी मत्तो विद्यादिना गर्वितः विद्विट् शत्रुः क्रूरो हृदाभ्यंतरकोपः वाक्कायव्यापारेणोद्वेजक उग्रः पतितो ब्रह्महादिः व्रात्यः पतितसावित्रीकः दांभिको वंचकः उच्छिष्टभोजी परभुक्तोज्झिताशी एतेषां चिकित्सकादीनामन्नं नाश्नीयात् १६१ अवीरा स्त्री स्वतंत्रा व्यभिचारमंतरेणापि पतिपुत्ररहितेत्यर्थः स्वर्णकारः स्वर्णस्य विकारांतरकृत् स्त्रीजितः सर्वत्र स्त्रीवशवर्ती ग्रामयाजी ग्रामस्य शांत्यादिकर्ता बहूनामुपनेता वा शस्त्रविक्रयी शस्त्रविक्रयोपजीवी कर्मारो लोहकारः तक्षादिश्च तंतुवायः सूचीशिल्पोपजीवी श्वभिर्वृत्तं वर्तनं जीवनमस्यास्तीति श्ववृत्ती एतेषामन्नं नाश्नीयात् १६२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृशंसोनिर्दयः राजाभूपतिः तत्साहचर्यात्पुरोहितश्च यथाहशंखः भीतावगीतरुदितावक्रंदितावघुष्टक्षुभितपरिभुक्तोर्विस्मितोन्मत्तावधूत-
राजपुरोहितान्नानिवर्जयेत्इति रजकोवस्त्रादीनांनीलादिरागकारकः कृतघ्नउपकृतस्यहंता वधजीवीप्राणिनांवधेनवर्तकः चैलधावःवस्त्र
निर्णेजनकृत् सुराजीवोमद्यविक्रयजीवी उपपतिर्जारः सहोपपतिनावेश्मयस्यासौसहोपपतिवेश्मा पिशुनः परदोषस्यख्यापकः अनृतीमिथ्या
वादीचाक्रिकस्तैलिकः शाकटिकश्चेत्येके अभिशस्तःपतितश्चाक्रिकस्तैलिकइतिभेदेनाभिधानात् बंदिनस्तावकाः सोमविक्रयीसोमलतायां

नृशंसराजरजककृतघ्नवधजीविनाम् चैलधावसुराजीवसहोपपतिवेश्मनाम् १६३ पिशुनानृतिनोश्चै
वतथाचाक्रिकबंदिनाम् एषामन्नंनभोक्तव्यंसोमविक्रयिणस्तथा १६४ शूद्रेषुदासगोपालकुलमित्रार्धसी
रिणः भोज्यान्नानापितश्चैवयश्चात्मानंनिवेदयेत् १६५

विक्रेता एतेषामन्नंनभोक्तव्यं सर्वेचैतेकदर्यादयोद्विजाएवकदर्य-
त्वादिदोषदुष्टाअभोज्यान्नाः इतरेषांप्राप्त्यभावात्प्राप्तिपूर्वकत्वाच्चनिषेधस्य १६३ १६४ अग्निहीनस्यनान्नमद्यादनापदीत्यत्रशूद्रस्याभो-
ज्यान्नत्वमुक्तंतत्रप्रतिप्रसवमाह दासागर्भदासादयः गोपालोगवांपालकः गवांपालनेनयोजीवति कुलमित्रंपितृपितामहादिक्रमायातः अर्धसी
रीहलपर्यायसीरोपलक्षितकृषिफलभागग्राही नापितोगृहव्यापारकारयितानापितश्च यश्चवाङ्मनःकार्यकर्मभिरात्मानंनिवेदयतितवाहमिति एते ३२
दासादयः शूद्राणांमध्येभोज्यान्नाः चकारात्कुंभकारश्च गोपनापितकुंभकारकुलमित्रार्धिकनिवेदितात्मानोभोज्यान्नाइतिवचनात् इतिस्नातकव्रत-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकरणम् १६५ नस्वाध्यायविरोध्यर्थमित्यत आरभ्य ब्राह्मणस्य स्नातकव्रतान्यभिधायेदानीं द्विजातिधर्मानाह अनर्चितं अर्चार्हाय य
द्वज्ञयादीयते वृथामांसं वक्ष्यमाणप्राणात्ययादिव्यतिरेकेण देवाद्यर्चनावशिष्टं यन्न भवति आत्मार्थमेव यत्साधितं केशकीटादिभिश्च सम-
न्वितं संयुक्तं यत्स्वयमनम्लं केवलकालपरिवासेन द्रव्यांतरसंसर्गकालपरिवासाभ्यां चाम्लीभवति तच्छुक्तं दध्यादिव्यतिरेकेण नपापीयसो-
न्नमश्नीयात् नद्विःपक्वं न शुक्तं न पर्युषितं अन्यत्र रागखांडवचुक्रदधिगुड गोधूमयवपिष्टविकारेभ्य इति शंखस्मरणात् पर्युषितं रात्र्यंतरि
तं उच्छिष्टं भुक्तोज्झितं श्वस्पृष्टं शुनास्पृष्टं पतितेक्षितं पतितादिभिरीक्षितं उदक्या रजस्वला तया स्पृष्टं उदक्याग्रहणं चांडालाद्युपलक्षणार्थं अ

अनर्चितं वृथामांसं केशकीटसमन्वितं शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम् १६६ उदक्यास्पृष्टं संघुष्टं पर्यायान्नं
च वर्जयेत् गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः १६७ अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितं अस्नेहा अपि गोधूम
यवगोरसविक्रियाः १६८

मेध्यपतितचांडालपुल्कसरजस्वलाकुनखिकुष्ठिसंस्पृष्टान्नं वर्जयेदिति शंखस्मरणात् कोभुंक्ते इति य
दाघुष्य दीयते तत्संघुष्टान्नं अन्नसंबंध्यन्यव्यपदेशेन यद्दीयते तत्पर्यायान्नं यथा ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत् उभावेतावभो
ज्यान्नौ भुक्त्वा चांद्रायणं चरेदिति पर्याचांतमिति पाठे परिगतमाचांतं गंडूषग्रहणं यस्मिन् तत्पर्याचांतं तन्न भोक्तव्यं एतदुक्तं भवति गंडूषग्रह
णादूर्ध्वं आचमनात्प्राक् न भोक्तव्यं पार्श्वाचांतमिति पाठे एकस्यां पंक्तौ पार्श्वस्थे आचांते न भोक्तव्यं भस्मोदकादिविच्छेदेन विना वर्जयेदिति प्रसे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंसंबध्यते तथागोघ्रातंगवाघ्रातं शकुनेनकाकादिनाभुक्तमास्वादितंशकुनोच्छिष्टं पदास्पृष्टंबुद्धिपूर्वंपादेनस्पृष्टंवर्जयेत् १६६ १६७ पर्युषित
स्यप्रतिप्रसवमाह अन्नमदनीयंपर्युषितंघृतादिस्नेहसंयुक्तंचिरकालसंस्थितमपिभोज्यं गोधूमयवगोरसविक्रियाः मंडकसक्तुकिलाटकूर्चिका
दयः अस्नेहाअपिचिरकालसंस्थिताभोज्याः यदिविकारांतरमनापन्नाः अपूपधानाकरंभसक्तुपावकतैलपायसशाकानिशुक्तानिवर्जयेदितिव
सिष्ठस्मरणात् १६८ गोर्यावृषेणसंधीयतेसाचसंधिनी वशांवंध्यांविजानीयावृषांक्रांतांचसंधिनीमितित्रिकांडीस्मरणात् याचैकांवेलामति
क्रम्यदुह्यतेयाचवत्सांतरेणसंधीयतेसापिसंधिनी प्रसूताअनतिक्रांतदशाहाअनिर्दशा मृतवत्साअवत्सा संधिनीचअनिर्दशाच अवत्साचसं

संधिन्यनिर्दशावत्सागोपयः परिवर्जयेत् औष्ट्रमैकशफंस्त्रैणमारण्यकमथाविकम् १६९

धिन्यनिर्दशावत्साः ताश्चतागावश्चतासांपयः क्षीरंपरिवर्जयेत् संधिनीग्रहणंस्यंदिनीयमलस्वोरुपलक्षणार्थं यथाहगौतमः स्यंदिनीयमसूसं
धिनीनांचेति स्रवत्पयः स्तनीस्यंदिनी यमलप्रसूर्यमलप्रसविनी एवमजामहिष्योश्चानिर्दशयोः पयोवर्जयेत् गोमहिष्यजानामनिर्दशानामितिव
सिष्ठस्मरणात् पयोग्रहणात्तद्विकाराणामपिदध्यादीनांनिषेधः नहिमांसनिषेधेतद्विकाराणामनिषेधोयुक्तः विकारनिषेधेप्रकृतेरनिषेधोयुक्तः
पयोनिषेधात् शकृन्मूत्रादेरनिषेधः उष्ट्राज्जातमौष्ट्रंपयोमूत्रादि एकशफावडवादयः तत्प्रभवमैकशफं स्त्रीभवंस्त्रैणं स्त्रीग्रहणमजाव्यतिरिक्तस
कलद्विस्तनीनामुपलक्षणार्थं सर्वासांद्विस्तनीनांक्षीरमभोज्यमजावर्जमितिशंखस्मरणात् अरण्येभवाआरण्यकास्तदीयमारण्यकंक्षीरं मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=10.06.20 14:16
,TRANSFERRED=2020/06/10 at 14:26:54
,PAGES=69
,TYPE=STD
,NAME=S0003113
,Book Name=M-2898-MITASHARA SAHIT YAGVALAV SMIRITI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection